॥ काशिका ॥

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः ॥ १ ॥
इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥ २ ॥
व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यम् एतावत् ।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ॥ ३ ॥

॥अथ शब्दानुशासनम्॥

केषां शब्दानाम् ? लौकिकानां वैदिकानां च । कथमनुशासनम् ? प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन । अथ किमर्थो वर्णानामुपदेशः? प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः ॥

अइउण् ॥ १॥

अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन 'उरण् रपरः' (१.१.५१) इत्यकारेण । ह्रस्वमवर्णं प्रयोगे संवृतम्। दीर्घप्लुतयोस्तु विवृतत्वम् । तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते। तस्य प्रयोगार्थम् 'अ अ' (८.४.६८) इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते॥

ऋऌक् ॥ २ ॥

ऋ ऌ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ककारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः। 'अकः सवर्णे दीर्घः' (६.१.१०१) इत्यकारेण । 'इको गुणवृद्धी' (१.१.३) इतीकारेण । 'उगितश्च' (४.१.६) इत्युकारेण । अकारादयो वर्णाः प्रचुरप्रयोगविषयास्तेषां सुज्ञानमुपदेशे प्रयोजनम् । ऌकारस्तु क्ऌपिस्थ एव प्रयुज्यते क्ऌपेश्च 'पूर्वत्रासिद्धम्' (८.२.१) इति लत्वमसिद्धम् । तस्यासिद्धत्वाद् ऋकार एव अच्कार्याणि भविष्यन्तीति किमर्थम् ऌकार उपदिश्यते ? लत्वविधानाद् यानि पराण्यच्कार्याणि तानि ऌकारे यथा स्युरिति। कानि पुनस्तानि ? प्लुतः स्वरितो द्विर्वचनम्। क्ऌ३प्तशिख। प्रक्ऌप्तः। क्ऌप्तः। क्ऌप्तवान् इति। यच्चाशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते। तत्स्थस्यापि ऌकारस्याच्कार्यप्रतिपत्त्यर्थम् ऌकारोपदेशः

---

१ - ' ० कृत्यम् ' इति पद० ।

क्रियते । ऋतक इति प्रयोक्तव्ये शक्तिवैकल्यात् कुमारी ऌतक इति प्रयुङ्क्ते। तदन्योऽनुकरोति कुमार्यॄऌतक इत्याहेति ॥

एओङ् ॥ ३ ॥

ए ओ इत्येतौ वर्णावुपदिश्यान्ते ङकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन । 'एङि पररूपम्' (६.१.९४) इत्येकारेण ॥

ऐऔच् ॥ ४ ॥

ऐ औ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति चतुर्भिः। 'अचः परस्मिन् पूर्वविधौ' (१.१.५७) इत्यकारेण। 'इच एकाचोऽम्प्रत्ययवच्च' (६.३.६८) इति इकारेण। 'एचोऽयवायावः' (६.१.७८) इति एकारेण। 'वृद्धिरादैच्' (१.१.१) इति ऐकारेण।

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः॥

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति, तच्छायानुकारिणो हि ते न पुनस्त एव। पृथक्प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः। नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्। नुड्विधौ (७.४.७१) ऋकारग्रहणम्—आनृधतुः, आनृधुः। लादेशे (८.२.१८) ऋकारग्रहणम्—क्लृप्तः। क्लृप्तवान्। विनामे (८.४.१) ऋकारग्रहणम्—कर्तॄणाम्॥

हयवरट् ॥ ५ ॥

ह य व र इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते टकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन। 'शश्छोऽटि' (८.४.६३) इत्यकारेण। अयं रेफो यकारात् पर उपदिश्यते। तस्य यर्ग्रहणेन ययूग्रहणेन च ग्रहणे सति स्वर्नयति, प्रातर्नयतीत्यत्र 'यरोऽनुनासिके- ऽनुनासिको वा' (८.४.४५) इति अनुनासिकः प्राप्नोति। मद्रह्रदो भद्रह्रद इत्यत्र द्विर्वचनं प्राप्नोति 'अचो रहाभ्यां द्वे' (८.४.४६) इति। कुण्डं रथेन, वनं रथेनेत्यत्र 'अनुस्वारस्य ययि परसवर्णः' (८.४.५८) इति परसवर्णः प्राप्नोति। नैष दोषः। आकृतौ पदार्थे समुदाये सकृल्लक्ष्ये लक्षणं प्रवर्तत इत्येतस्मिन् दर्शने यरोऽनुनासिकेऽनुनासिको वान्तरतमो भवतीत्येवमेतत् प्रवर्तते। तदनेन गकारादीनां ङकारादयो ये यथास्वं स्थानतो गुणतश्चान्तरतमास्ते सर्वे विहिताः।

---

१. वा पदान्तस्य (८.४.८६) इत्यभिप्रायः।

ये तु न स्थानतो नापि गुणतः, स्थानमात्रेण गुणमात्रेण वान्तरतमास्ते सर्वे निवर्तिता इति स्थानमात्रान्तरतमो रेफस्य णकारो न भवति। द्विर्वचनेऽपि रेफस्य यरन्तर्भावे सति यर्कार्यं प्राप्तम्, तत् साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः। 'अनुस्वारस्य ययि परसवर्णः' (८.४.५८) इत्येतदप्यनुस्वारान्तरतमं सकृदेव परसवर्णं विदधाति। न च रेफस्यानुस्वारान्तरतमः सवर्णोऽस्तीति न भविष्यति कुण्डं रथेन वनं रथेनेत्यत्र। अटां मध्ये विसर्जनीयजिह्वामूलीयो- पध्मानीयानामप्युपदेशः कर्तव्यः। किं प्रयोजनम् ? उर×केण, उरःकेण। उर×पेण, उरःपेण। अत्राड्व्यवाये (८.४. २) इति णत्वं यथा स्यादिति॥

लण् ॥ ६ ॥

ल इत्येकं वर्णमुपदिश्य पूर्वांश्चान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः। 'अणुदित्सवर्णस्य चाप्रत्ययः' (१.१.६९) इत्यकारेण। 'इण्कोः' (८.३.५७) इतीकारेण। 'इको यणचि' (६.१.७७) इति यकारेण। इण्ग्रहणानि सर्वाणि परेण णकारेण, अण्ग्रहणानि तु पूर्वेण। 'अणुदित्सवर्णस्य चाप्रत्ययः' (१.१.६९) इत्येकम् अनेन। अथ किमर्थमज्ग्रहणमेवैतन्न क्रियते ? नैवं शक्यम्। अन्तःस्थानामपि हि सवर्णानां ग्रहणमिष्यते। सँय्यन्ता, सँव्वत्सरः, यँल्लोकम्, तँल्लोकमित्यत्रानुस्वारस्यानुनासिके ययि परसवर्णे (८.४.५८) कृते तस्य यर्ग्रहणेन ग्रहणाद् द्विर्वचनं (८.४.४७) यथा स्यादिति। हकारादिष्वकार उच्चारणार्थो नानुबन्धः। लकारे त्वनुनासिकः प्रतिज्ञायते। तेन 'उरण् रपरः' (१.१.५१) इत्यत्र र इति प्रत्याहारग्रहणाल्लपरत्वमपि भवति॥

ञमङणनम् ॥ ७ ॥

ञ म ङ ण न इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते मकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः। 'पुमः खय्यम्परे' (८.३.६) इत्यकारेण। 'हलो यमां यमि लोपः' (८.४.६४) इति यकारेण। 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८.३.३२) इति ङकारेण। 'ञमन्ताड्डः' (प० उ० १.११४) इति ञकारेणापि ग्रहणमस्य दृश्यते। केचित् तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेण भवन्तीति मकारमनुबन्धं प्रत्याचक्षते। तथा च सति 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८.३.३२) इत्यत्रागमिनोर्झभोरभावादागमाभाव- प्रतिपत्तौ प्रतिपत्तिगौरवं भवति॥

---

१ - 'यत्कार्यत्वम् ' इति बाल०। २ - ' परेण ' इति पद०। ३ - ' नेत्संज्ञकः ' इति न्या०।

झभञ् ॥ ८ ॥

झ भ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ञकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन, 'अतो दीर्घो यञि' (७.३.१०१) इति यकारेण॥

घढधष् ॥ ९ ॥

घ ढ ध इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति द्वाभ्याम्। 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७) इति भकारझकाराभ्याम्॥

जबगडदश् ॥ १० ॥

ज ब ग ड द इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति षड्भिः। 'भोभगोअघोअपूर्वस्य योऽशि' (८.३.१७) इति अकारेण। 'हशि च' (६.१.११४) इति हकारेण। 'नेड् वशि कृति' (७.२.८) इति वकारेण। 'झलां जश् झशि' (८.४.५३) इति जकारझकाराभ्याम्। 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७) इति बकारेण॥

खफछठथचटतव् ॥ ११ ॥

ख फ छ ठ थ च ट त इत्येतान् वर्णानुपदिश्यान्ते वकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन 'नश्छव्यप्रशान्' (८.३.७) इति छकारेण। खफग्रहणमुत्तरार्थम्॥

कपय् ॥ १२ ॥

क प इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति चतुर्भिः। 'अनुस्वारस्य ययि परसवर्णः' (८.४.५८) इति यकारेण। 'मय उञो वो वा' (८.३.३३) इति मकारेण। 'झयो होऽन्यतरस्याम्' (८.४.६२) इति झकारेण। 'पुमः खय्यम्परे' (८.३.६) इति खकारेण॥

शषसर् ॥ १३ ॥

श ष स इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते रेफमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति पञ्चभिः। 'यरोऽनुनासिकेऽनुनासिको वा' (८.४.४५) इति यकारेण। 'झरो झरि सवर्णे' (८.४.६५) इति झकारेण। 'खरि च' (८.४.५५) इति खकारेण। 'अभ्यासे चर्च' (८.४.५४) इति चकारेण। 'शर्पूर्वाः खयः' (७.४.६१) इति शकारेण॥

हल् ॥ १४ ॥

ह इत्येकं वर्णमुपदिश्य पूर्वांश्चान्ते लकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति षड्भिः। 'अलोऽन्त्यात् पूर्व उपधा' (१.१.६५) इति अकारेण। 'हलोऽनन्तराः संयोगः' (१.१.७) इति हकारेण। 'लोपो व्योर्वलि' (६.१.६६) इति वकारेण। 'रलो व्युपधाद्धलादेः संश्च' (१.२.२६) इति रेफेण। 'झलो झलि' (८.२.२६) इति झकारेण। 'शल इगुपधादनिटः क्सः' (३.१.४५) इति शकारेण। अथ किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते ? कित्त्वविकल्पक्सेड्विधयो यथा स्युरिति। स्निहित्वा स्नेहित्वेत्यत्र 'रलो व्युपधाद्धलादेः संश्च' (१.२.२६) इति कित्त्वं वा यथा स्यात्। लिहेरलिक्षदिति 'शल इगुपधादनिटः क्सः' (३.१.४५) इति क्सो यथा स्यात्। रुदिहि स्वपिहीति वलादिलक्षण इड् (७.२.७६) यथा स्यात्। अदाग्धाम्। झल्ग्रहणेषु (८.२.२६) च हकारस्य ग्रहणं यथा स्यात्। यद्येवं हयवरडित्यत्र तर्हि किमर्थमुपदिश्यते? महाँ हि सः, देवा हसन्तीत्यत्राड्ग्रहणेषु (८.३.३) चाश्ग्रहणेषु (८.३.२२) च हकारस्य ग्रहणं यथा स्यात्। ब्राह्मणो हसति—'हशि च' (६.१.११४) इति उत्वं यथा स्यात्।

एकस्मान् ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः॥ इति ॥

॥ इति प्रत्याहारप्रकरणम्॥

॥ अथ प्रथमाध्यायस्य प्रथमः पादः ॥

वृद्धिरादैच् ॥ १ ॥

वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च। तपरकरणमैजर्थं तादपि परस्तपर इति, खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये। आश्वलायनः। ऐतिकायनः। औपगवः। औपमन्यवः। शालीयः। मालीयः। वृद्धिप्रदेशाः—'सिचि वृद्धिः परस्मैपदेषु' (७.२.१) इत्येवमादयः॥

अदेङ् गुणः ॥ २ ॥

गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च। तपरकरणं त्विह सर्वार्थम्। तरिता। चेता। स्तोता। पचन्ति। यजन्ति। अहं

---

१ - ' हकारस्य ' इति नास्ति बाल०, तारा० ।

२ - ' हशि चेति हकारस्य ग्रहणं यथा स्यात् ' इत्यधिकं बाल०, तारा० ।

पचे। गुणप्रदेशाः—'मिदेर्गुणः' (७.३.८२) इत्येवमादयः॥

इको गुणवृद्धी ॥ ३ ॥

परिभाषेयं स्थानिनियमार्था। अनियमप्रसङ्गे नियमो विधीयते। वृद्धिगुणौ स्वसंज्ञया शिष्यमाणाविक एव स्थाने वेदितव्यौ। वक्ष्यति—'सार्वधातुकार्धधातुकयोः' (७.३.८४) अङ्गस्य गुण इति। स इक एव स्थाने वेदितव्यः। तरति । नयति। भवति। वृद्धिः खल्वपि—अकार्षीत्। अहार्षीत्। अचैषीत्। अनैषीत्। अलावीत्। अस्तावीत्। यत्र गुणवृद्धी स्वसंज्ञया विधीयेते तत्र इक इति एतदुपस्थितं द्रष्टव्यम्। किं कृतं भवति ? द्वितीया षष्ठी प्रादुर्भाव्यते। मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेष्वङ्गेनेग् विशेष्यते। जुसि सार्वधातुकादिगुणेष्विकाङ्गं विशेष्यते। मेद्यति। अबिभयुः। इक इति किम् ? आत्सन्ध्यक्षरव्यञ्जनानां मा भूत्—यानम्। ग्लायति। उम्भिता । पुनर्गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम्। इह मा भूत्—द्यौः। पन्थाः। सः। इममिति॥

न धातुलोप आर्धधातुके ॥ ४ ॥

धात्वेकदेशो धातुः, तस्य लोपो यस्मिन्नार्धधातुके तदार्धधातुकं धातुलोपम्, तत्र ये गुणवृद्धी प्राप्नुतस्ते न भवतः। लोलुवः। पोपुवः। मरीमृजः। लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि (३.१.१३४) विहिते 'यङोऽचि च' (२.४.७४) इति यङो लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः। धातुग्रहणं किम् ? लूञ्—लविता। रेड्सि (मा० सं० ६.१८)। पर्णं नयेः। अनुबन्धप्रत्ययलोपे मा भूत्। रिषेर्हिंसार्थस्य विच्प्रत्ययलोप उदाहरणं रेडिति। आर्धधातुक इति किम् ? त्रिधा॑ब॒द्धो वृ॑ष॒भो रो॑रवीति (ऋ० ४.५८.३)। सार्वधातुके मा भूत्। इक इत्येव—अभाजि। रागः। बहुव्रीहिसमाश्रयणं किम् ? क्नोपयति। प्रेद्धम्॥

क्ङिति च ॥ ५ ॥

निमित्तसप्तम्येषा। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः। चितः। चितवान्। स्तुतः। स्तुतवान्। भिन्नः। भिन्नवान्। मृष्टः। मृष्टवान्। ङिति खल्वपि—चिनुतः, चिन्वन्ति। मृष्टः, मृजन्ति। गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते। 'ग्लाजिस्थश्च क्स्नुः' (३.२.१३६)—जिष्णुः। भूष्णुः। इक इत्येव—कामयते। लैगवायनः। मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते। संक्रमो नाम गुणवृद्धिप्रतिषेधविषयः। परिमृजन्ति,

---

१ - ' भवत इति वेदितव्यम्' इति पाठान्तरम्। २ - ' यत्र ' इति न सार्वत्रिकः।

३ - ' मेद्यते ' इति प्रायिकोऽपपाठः। ४ - ' प॑र्णं न वेः ' (ऋ० ४.४०.३) इति है० शोधितः पाठः। सोऽपि सन्दिग्धः।

परिमार्जन्ति। परिमृजन्तु, परिमार्जन्तु। लघूपधगुणस्याप्यत्र प्रतिषेधः। अचिनवमसुनवमित्यादौ लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकं ङिति यत् कार्यं तल्लकारे ङिति न भवतीति॥

दीधीवेवीटाम् ॥ ६ ॥

दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः। आदीध्यनम्। आदीध्यकः। आवेव्यनम्। आवेव्यकः। इटः खल्वपि—कणिता श्वः, रणिता श्वः। वृद्धिरिटो न संभवतीति लघूपधगुणस्यात्र प्रतिषेधः॥

हलोऽनन्तराः संयोगः ॥ ७ ॥

भिन्नजातीयैरञ्जिभिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति। समुदायः संज्ञी। जातौ चेदं बहुवचनम्, तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा भवति। अग्निरिति गनौ। अश्व इति शवौ। कर्ण इति रणौ। इन्द्रश्चन्द्रो मन्द्र इति नदराः। उष्ट्रो राष्ट्रं भ्राष्ट्रमिति षटराः। तिलान्स्त्र्यावपतीति नसतरयाः, नतसतरया वा। हल इति किम् ? तितउच्छत्रम्। 'संयोगान्तस्य लोपः' (८.२.२३) इति लोपः स्यात्। अनन्तरा इति किम् ? पचति। पनसम्। 'स्कोः संयोगाद्योः०' (८.२.२६) इति लोपः स्यात्। संयोगप्रदेशाः—'संयोगान्तस्य लोपः' (८.२.२३) इत्येवमादयः॥

मुखनासिकावचनोऽनुनासिकः ॥ ८ ॥

मुखसहिता नासिका मुखनासिका, तया य उच्चार्यते वर्णः सोऽनुनासिकसंज्ञो भवति। 'आडोऽनुनासिकश्छन्दसि' (६.१.१२६)—अ॒[1]ग्न आँ अ॒[1]पः (ऋ० ५.४८.१)। ग॒[1]भी॒र आँ उग्र॒पुत्रे (ऋ० ८.६७.११)। च न आँ इन्द्रः। मुखग्रहणं किम् ? अनुस्वारस्यैव हि स्यात्। नासिकाग्रहणं किम् ? कचटतपानां मा भूत्। अनुनासिकप्रदेशाः—'आडो- ऽनुनासिकश्छन्दसि' (६.१.१२६) इत्येवमादयः॥

तुल्यास्यप्रयत्नं सवर्णम् ॥ ९ ॥

तुल्यशब्दः सदृशपर्यायः। आस्ये भवमास्यम्, ताल्वादिस्थानम्। प्रयतनं प्रयत्नः स्पृष्टतादिर्वर्णगुणः। तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति। चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते। स्पृष्टता, ईषत्स्पृष्टता, संवृतता, विवृतता चेति। अ अ अ इति त्रयोऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिका निरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधा भिद्यन्ते। तथेवर्णः।

---

१ – ' अपः ' इति पाठान्तरम्।

तथोवर्णः। तथा ऋवर्णः। ऌवर्णस्य दीर्घा न सन्ति। तं द्वादशप्रभेदमाचक्षते। सन्ध्यक्षराणां ह्रस्वा न सन्ति, तान्यपि द्वादशप्रभेदानि। अन्तःस्था द्विप्रभेदा रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च। रेफोष्मणां सवर्णा न सन्ति। वर्ग्यो वर्ग्येण सवर्णः। दण्डाग्रम्। खट्वाग्रम्। आस्यग्रहणं किम् ? कचटतपानां तुल्यप्रयत्नानां भिन्नस्थानानां मा भूत्। किं च स्यात् ? तर्प्ता, तर्प्तुमित्यत्र 'झरो झरि सवर्णे' (८.४.६५) इति पकारस्य तकारे लोपः स्यात्। प्रयत्नग्रहणं किम् ? इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां मा भूत्। किं च स्यात् ? अरुश्श्च्योततीत्यत्र 'झरो झरि सवर्णे' (८.४.६५) इति शकारस्य चकारे लोपः स्यात्॥ **ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या॥** होतृ ऌकारः—होतॄकारः। उभयोर्ऋ- वर्णस्य ऌवर्णस्य चान्तरतमः सवर्णो दीर्घो नास्तीति ऋकार एव दीर्घो भवति। सवर्णप्रदेशाः—'अकः सवर्णे दीर्घः' (६.१.१०१) इत्येवमादयः॥

नाज्झलौ ॥ १० ॥

अच्च हल् च अज्झलौ। तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः। अवर्णहकारौ—दण्डहस्तः। इवर्णशकारौ—दधि शीतम्। सवर्णदीर्घत्वं न भवति। वैपाशो मत्स्यः। आनडुहं चर्मेति 'यस्येति च' (६.४.१४८) इति लोपो न भवति॥

ईदूदेद्द्विवचनं प्रगृह्यम् ॥ ११ ॥

ईत् ऊत् एत् इत्येवमन्तं द्विवचनं शब्दरूपं प्रगृह्यसंज्ञं भवति। अग्नी इति। वायू इति। माले इति। पचेते इति। पचेथे इति। ईदूदेदिति किम् ? वृक्षावत्र। प्लक्षावत्र। द्विवचनमिति किम् ? कुमार्यत्र। किशोर्यत्र। तपरकरणमसंदेहार्थम्। प्रगृह्यप्रदेशाः—'प्लुतप्रगृह्या अचि' (६.१.१२५) इत्येवमादयः। ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः।

मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम (महाभारत १२.१७७.१२)।
दम्पतीव (ऋ० २.३९.२)। जम्पतीव। रोदसीव॥

अदसो मात् ॥ १२ ॥

अदसः सम्बन्धी यो मकारस्तस्मात् पर ईदूदेतः प्रगृह्यसंज्ञा भवन्ति। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते। एकारस्य नास्त्युदाहरणम्। अदस इति किम्? शम्यत्र। दाडिम्यत्र। मादिति किम् ? अमुकेऽत्र॥

---

१ - ' भिन्नजातीयानाम् ' इति है०। २ - ' खट्वे इति ' इत्यधिकं न्यासे।
३ - ' यजेते इति ' इति न्यासे।

शे ॥ १३ ॥

शे इत्येतत् प्रगृह्यसंज्ञं भवति। किमिदं शे इति ? सुपामादेशश्छन्दसि (७.१.३९)। न युष्मे वाजबन्धवः (ऋ० ८.६८.१९)। अ॒स्मे इन्द्राबृहस्पती (ऋ० ४.४९.४)। युष्मे इति। अस्मे इति। त्वे राय॒स्॒ मे राय॒स्॒ (मा० सं० ४.२२)। त्वे इति। मे इति। छान्दसमेतदेवैकमुदाहरणम् अ॒स्मे इन्द्राबृहस्पती इति। तत्र तथा पाठात्। इतरत् तु लौकिकमनुकरणम्। युष्मे इति। अस्मे इति। त्वे इति। मे इति॥

निपात एकाजनाङ् ॥ १४ ॥

एकश्चासावच्चेत्येकाच्। निपातो य एकाच् आङ्वर्जितः स प्रगृह्यसंज्ञो भवति। अ अपेहि। इ इन्द्रं पश्य। उ उत्तिष्ठ। आ एवं नु मन्यसे। आ एवं किल तत्। निपात इति किम् ? चकारात्र। जहारात्र। एकाजिति किम् ? प्राग्नये॒स्॒ वाचं मीरय (ऋ० १०.१८७.१)। अनाङिति किम् ? आ उदकान्तात् ओदकान्तात्।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्॥

ओत् ॥ १५ ॥

निपात इति वर्तते। तस्यौकारेण तदन्तविधिः। ओदन्तो यो निपातः स प्रगृह्यसंज्ञो भवति। आहो इति। उताहो इति॥

संबुद्धौ शाकल्यस्येतावनार्षे ॥ १६ ॥

ओदिति वर्तते। संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञो भवति, इतिशब्देऽनार्षेऽवैदिके परतः। वायो इति, वायविति। भानो इति, भानविति। संबुद्धाविति किम् ? गवित्ययमाह। अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादसत्यर्थवत्त्वे विभक्तिर्न भवति। शाकल्यग्रहणं विभाषार्थम्। इताविति किम् ? वायोऽत्र। अनार्ष इति किम् ? एता गा ब्रह्मबन्ध इत्यब्रवीत् (काठ० सं० १०.६)॥

उञः ॥ १७ ॥

शाकल्यस्येतावनार्ष इति वर्तते। उञः प्रगृह्यसंज्ञा भवति इतौ शाकल्यस्याचार्यस्य मतेन। शाकल्यस्येति विभाषार्थम्। उ इति। विति॥

ऊँ ॥ १८ ॥

उञ इति वर्तते। उञ इतावनार्षे ऊँ इत्ययमादेशो भवति दीर्घोऽनुनासिकश्च शाकल्यस्य मतेन प्रगृह्यसंज्ञकश्च। शाकल्यस्य ग्रहणं विभाषार्थमिहाप्यनुवर्तते, तेन त्रीणि रूपाणि भवन्ति। उ इति। विति। ऊँ इति॥

ईदूतौ च सप्तम्यर्थे ॥ १९ ॥

शाकल्यस्येतावनार्ष इति निवृत्तम्। ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्तमानं प्रगृह्यसंज्ञं भवति। अध्यस्यां मामकी तनू (पै० सं० ६.६.८)। मामक्यां तन्वामिति प्राप्ते। मामक्याम्, मामकी इति। तन्वाम्, तनू इति। सोमो॑ गौ१री अधि॑ श्रि॒तः (ऋ० ९.१२.३)। ईदूताविति किम् ? प्रि॒यः सूर्ये॑ प्रि॒यो अ१ग्ना भ॑वाति (ऋ० ५.३७.५)। अग्निशब्दात् परस्याः सप्तम्या डादेशः। सप्तमीग्रहणं किम् ? धीती मती सुष्टुती। धीत्या मत्या सुष्टुत्या इति प्राप्ते। अर्थग्रहणं किम् ? वाप्यश्वः। नद्यातिः। तपरकरणमसन्देहार्थम्।

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद् भवेत्।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते॥ १॥
वचनाद् यत्र दीर्घत्वं तत्रापि सरसी यदि।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत्॥ २॥

दाधा घ्वदाप् ॥ २० ॥

दारूपाश्चत्वारो धातवो धारूपौ च द्वौ दाब्दैपौ वर्जयित्वा घुसंज्ञका भवन्ति। डुदाञ्—प्रणिददाति। दाण्—प्रणिदाता। दो—प्रणिद्यति। देङ्—प्रणिदयते। डुधाञ्—प्रणिदधाति। धेट्—प्रणिधयति वत्सो मातरम्। अदाबिति किम् ? 'दाप् लवने' (अदा० ५२)—दातं बर्हिः। 'दैप् शोधने' (भ्वा० ६५८)—अवदातं मुखम्। घुप्रदेशाः—'घुमास्थागापाजहातिसां हलि' (६.४.६६) इत्येवमादयः॥

आद्यन्तवदेकस्मिन् ॥ २१ ॥

असहायस्याद्यन्तोपदिष्टानि कार्याणि न सिध्यन्तीत्ययमतिदेश आरभ्यते। सप्तम्यर्थे वतिः। आदाविव अन्त इव एकस्मिन्नपि कार्यं भवति। यथा क१र्तव्य॑म् इत्यत्र प्रत्ययाद्युदात्तत्वं (३.१.३) भवति, एवम् आ१प१ग१वम् इत्यत्रापि यथा स्यात्। यथा वृक्षाभ्यामित्यत्रातोऽङ्गस्य दीर्घत्वम् (७.३.१०२) एवमाभ्यामित्यत्रापि यथा स्यात्। एकस्मिन्निति किम् ?

---

१ - 'नेर्गदनदपतपदघुमास्यतीत्येवमादयः' इति पाठान्तरम्।

सभासन्नयने भवः साभासन्नयनः। आकारमाश्रित्य वृद्धसंज्ञा न भवति॥

तरप्तमपौ घः ॥ २२ ॥

तरप् तमप् इत्येतौ प्रत्ययौ घसंज्ञौ भवतः। कुमारितरा। कुमारितमा। ब्राह्मणितरा। ब्राह्मणितमा । घप्रदेशाः—'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' (६.३.४३) इत्येवमादयः॥

बहुगणवतुडति संख्या ॥ २३ ॥

बहु गण वतु डति इत्येते संख्यासंज्ञा भवन्ति। बहुकृत्वः। बहुधा। बहुकः। बहुशः। गणकृत्वः। गणधा। गणकः। गणशः। तावत्कृत्वः। तावद्धा। तावत्कः। तावच्छः। कतिकृत्वः। कतिधा। कतिकः। कतिशः। बहुगणशब्दयोर्वैपुल्ये सङ्घे च वर्तमानयोरिह ग्रहणं नास्ति, संख्यावाचिनोरेव। भूर्यादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते॥ अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यं समासकन्विध्यर्थम्॥ अर्धपञ्चमशूर्पः। अर्धं पञ्चमं येषामिति बहुव्रीहौ कृतेऽर्धपञ्चमैः शूर्पैः क्रीतः। 'तद्धितार्थो०' (२.१.५१) इति समासः । तत्र 'दिक्संख्ये संज्ञायाम्' (२.१.५०) इत्यनुवृत्तेस्ततः संख्यापूर्वस्य द्विगुसंज्ञायां (२.१.५२) 'शूर्पादञन्यतरस्याम्' (५.१.२६) इत्यञ् ठञ्च। 'अध्यर्धपूर्वद्विगोः०' (५.१.२८) इति लुक्। अर्धपञ्चमकः। संख्याप्रदेशाः—'संख्या वंश्येन' (२.१.१६) इत्येवमादयः ॥

ष्णान्ता षट् ॥ २४ ॥

स्त्रीलिङ्गनिर्देशात् संख्येति संबध्यते। षकारान्ता नकारान्ता च या संख्या सा षट्संज्ञा भवति। षकारान्ता तावत्—षट् तिष्ठन्ति। षट् पश्य। नकारान्ता—पञ्च। सप्त। नव। दश। अन्तग्रहणमौपदेशिकार्थम्। तेनेह न भवति—शतानि। सहस्राणि। अष्टानामित्यत्र नुड् (७.१.५५) भवति। षट्प्रदेशाः—'षड्भ्यो लुक्' (७.१.२२) इत्येवमादयः॥

डति च ॥ २५ ॥

डत्यन्ता च या संख्या सा षट्संज्ञा भवति। कति तिष्ठन्ति। कति पश्य॥

क्तक्तवतू निष्ठा ॥ २६ ॥

क्तश्च क्तवतुश्च क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः। कृतः। कृतवान्। भुक्तः।

---

१ - 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् (५.४.१७) इत्येवमादयः' इति पाठान्तरम्।

भुक्तवान्। ककारः कित्कार्यार्थः। उकार उगित्कार्यार्थः। निष्ठाप्रदेशाः—'श्वीदितो निष्ठायाम्' (७.२.१४) इत्येवमादयः॥

सर्वादीनि सर्वनामानि ॥ २७ ॥

सर्वशब्द आदिर्येषां तानीमानि सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वः, सर्वौ, सर्वे। सर्वस्मै। सर्वस्मात्। सर्वेषाम्। सर्वस्मिन्। सर्वकः। विश्वः, विश्वौ, विश्वे। विश्वस्मै। विश्वस्मात्। विश्वेषाम्। विश्वस्मिन्। विश्वकः। उभ, उभय—उभशब्दस्य सर्वनामत्वे प्रयोजनं 'सर्वनाम्नस्तृतीया च' (२.३.२७) इति। उभाभ्यां हेतुभ्यां वसति, उभयोर्हेत्वोर्वसति। उभये। उभयस्मै। उभयस्मात्। उभयेषाम्। उभयस्मिन्। डतर, डतम—कतर। कतम। कतरस्मै। कतमस्मै। इतर, अन्य, अन्यतर—इतरस्मै। अन्यस्मै। अन्यतरस्मै। त्वशब्दोऽन्यवाची स्वरभेदाद् द्विः पठितः। एक उदात्तः, द्वितीयोऽनुदात्तः। केचित् तकारान्तमेकं पठन्ति त्व त्वदिति, द्वावपि चानुदात्ताविति स्मरन्ति। नेम—नेमस्मै। वक्ष्यमाणेन (१.१.३३) जसि विभाषा भवति। नेमे, नेमा इति। सम—समस्मै। कथं 'यथासंख्यमनुदेशः समानाम्' (१.३.१०), समे देशे यजेतेति? समस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञेष्यते, न सर्वत्र। सिम—सिमस्मै। पूर्वपरावरदक्षिणोत्तरापरा- धराणि व्यवस्थायामसंज्ञायाम् (ग० सू० १)। स्वमज्ञातिधनाख्यायाम् (ग० सू० २)। अन्तरं बहिर्योगोपसंव्यानयोः (ग० सू० ३)। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। सर्वादिः। सर्वनामप्रदेशाः—'सर्वनाम्नः स्मै' (७.१.१४) इत्येवमादयः॥

विभाषा दिक्समासे बहुव्रीहौ ॥ २८ ॥

'न बहुव्रीहौ' (१.१.२६) इति प्रतिषेधं वक्ष्यति, तस्मिन्नित्ये प्रतिषेधे प्राप्ते विभाषेयमारभ्यते। दिशां समासो दिक्समासः। दिगुपदिष्टे समासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति। उत्तरपूर्वस्यै, उत्तरपूर्वायै। दक्षिणपूर्वस्यै, दक्षिणपूर्वायै। दिग्ग्रहणं किम्? 'न बहुव्रीहौ' (१.१.२६) इति प्रतिषेधं वक्ष्यति, तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेध इति। दिग्ग्रहणे पुनः क्रियमाणे ज्ञायते दिगुपदिष्टसमासे विभाषा, अन्यत्र प्रतिषेध इति। समासग्रहणं किम्? समास एव यो बहुव्रीहिस्तत्र विभाषा यथा स्यात्, बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत्। दक्षिणदक्षिणस्यै देहि। बहुव्रीहाविति किम्? द्वन्द्वे विभाषा मा भूत्—दक्षिणोत्तरपूर्वाणामिति। 'द्वन्द्वे च' (१.१.३१) इति नित्यं प्रतिषेधो भवति॥

न बहुव्रीहौ ॥ २९ ॥

सर्वनामसंज्ञायां तदन्तविधेरभ्युपगमाद् बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते। बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। प्रियविश्वाय। प्रियोभयाय। द्व्यन्याय। त्र्यन्याय। इह च त्वत्कपितृको मत्कपितृक इत्यकज् न भवति। बहुव्रीहाविति वर्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वमात्रेऽपि प्रतिषेधो यथा स्यात्—वस्त्रान्तरवसनान्तरा इति॥

तृतीयासमासे ॥ ३० ॥

तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। मासपूर्वाय। संवत्सरपूर्वाय। द्व्यहपूर्वाय। त्र्यहपूर्वाय। समास इति वर्तमाने पुनः समासग्रहणं तृतीयासमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात्। मासेन पूर्वाय। 'पूर्वसदृशसमोनार्थ०' (२.१.३१) इति तृतीयासमासं प्रतिपदं वक्ष्यति, तस्येदं ग्रहणम्, न यस्य कस्यचित् तृतीयासमासस्य, 'कर्तृकरणे कृता बहुलम्' (२.१.३२) इति। त्वयका कृतम्। मयका कृतम्॥

द्वन्द्वे च ॥ ३१ ॥

द्वन्द्वे च समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। पूर्वापराणाम्। कतरकतमानाम्॥

विभाषा जसि ॥ ३२ ॥

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषारभ्यते। द्वन्द्वे समासे जसि विभाषा सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। कतरकतमे, कतरकतमाः। जसः कार्यं प्रति विभाषा, अकज् हि न भवति। कतरकतमकाः॥

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥ ३३ ॥

'विभाषा जसि' (१.१.३२) इति वर्तते। द्वन्द्व इति निवृत्तम्। प्रथम चरम तय अल्प अर्ध कतिपय नेम इत्येते जसि विभाषा सर्वनामसंज्ञा भवन्ति। प्रथमे, प्रथमाः। चरमे, चरमाः। द्वितये, द्वितयाः। अल्पे, अल्पाः। अर्धे, अर्धाः। कतिपये, कतिपयाः। नेमे, नेमाः। तय इति तयप्रत्ययः। शिष्टानि प्रातिपदिकानि। तत्र नेम इति सर्वादिषु पठ्यते, तस्य प्राप्ते विभाषा, अन्येषामप्राप्ते। उभयशब्दस्य तयप्रत्ययान्तस्य गणे पाठान्नित्या सर्वनामसंज्ञा। इहापि जस्कार्यं प्रति विभाषा। काकचोर्यथायोगं वृत्तिः॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥ ३४ ॥

पूर्व पर अवर दक्षिण उत्तर अपर अधर इत्येतेषां गणे पाठात् पूर्वेण नित्यायां सर्वनामसंज्ञायां प्राप्तायां जसि विभाषारभ्यते। पूर्वादीनि विभाषा जसि सर्वनामसंज्ञानि भवन्ति व्यवस्थायामसंज्ञायाम्। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। पूर्वे, पूर्वाः। परे, पराः। अवरे, अवराः। दक्षिणे, दक्षिणाः। उत्तरे, उत्तराः। अपरे, अपराः। अधरे, अधराः। व्यवस्थायामिति किम् ? दक्षिणा इमे गाथकाः। प्रवीणा इत्यर्थः। असंज्ञायामिति किम् ? उत्तराः कुरवः। सत्यामेव व्यवस्थायामियं तेषां संज्ञा॥

स्वमज्ञातिधनाख्यायाम् ॥ ३५ ॥

अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्यते। स्वमित्येतच् छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति, न चेज् ज्ञातिधनयोः संज्ञारूपेण वर्तते। स्वे पुत्राः, स्वाः पुत्राः। स्वे गावः, स्वा गावः। आत्मीया इत्यर्थः। ज्ञातिप्रतिषेधः किम् ?

धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः।
उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ॥ (महाभारत ५.३६.५८)

अधनाख्यायामिति किम् ? प्रभूताः स्वा न दीयन्ते। प्रभूताः स्वा न भुज्यन्ते। प्रभूतानि धनानीत्यर्थः॥

अन्तरं बहिर्योगोपसंव्यानयोः ॥ ३६ ॥

अत्रापि पूर्वेण नित्या सर्वनामसंज्ञा प्राप्ता सा जसि विभाष्यते। अन्तरमित्येतच् छब्दरूपं विभाषा जसि सर्वनामसंज्ञं भवति बहिर्योग उपसंव्याने च गम्यमाने। अन्तरे गृहाः, अन्तरा गृहाः। नगरबाह्याश्चाण्डालादिगृहा उच्यन्ते। अन्तरे शाटकाः, अन्तराः शाटकाः। उपसंव्यानं परिधानीयमुच्यते, न प्रावरणीयम्। बहिर्योगोपसंव्यानयोरिति किम् ? अनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति। तस्मिन्नन्तरे शीतान्युदकानि। मध्यप्रदेशवचनो- ऽन्तरशब्दः। गणसूत्रस्य चेदं प्रत्युदाहरणम् ॥ अपुरीति वक्तव्यम्॥ अन्तरायां पुरि वसति ॥ विभाषाप्रकरणे तीयस्य वा ङित्सु सर्वनामसंज्ञेत्युपसंख्यानम्॥ द्वितीयस्मै, द्वितीयाय। तृतीयस्मै, तृतीयाय॥

स्वरादिनिपातमव्ययम् ॥ ३७ ॥

स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञानि भवन्ति। स्वर्, अन्तर्, प्रातर् एतेऽन्तोदात्ताः पठ्यन्ते। पुनर् आद्युदात्तः। सनुतर्, उच्चैस्, नीचैस्, शनैस्, ऋधक्,

---

१ - ' स्वाभिधेयापेक्षोऽवधिनियमः ' इति पाठान्तरम् ।

आरात्, ऋते, युगपत्, पृथक् एतेऽपि सनुतर्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते। ह्यस्, श्वस्, दिवा, रात्रौ, सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तूष्णीम्, बहिस्, आविस्, अवस्, अधस्, समया, निकषा, स्वयम्, मृषा, नक्तम्, नञ्, हेतौ, अद्धा, इद्धा, सामि एतेऽपि ह्यस्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते । वत् (ग० सू० ४), वदन्तमव्ययसंज्ञं भवति। ब्राह्मणवत्। क्षत्रियवत्। सन्, सनात्, सनत्, तिरस् एत आद्युदात्ताः पठ्यन्ते। अन्तरा अयमन्तोदात्तः। अन्तरेण, ज्योक्, कम्, शम्, सना, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, वषट्, अन्यत्, अस्ति, उपांशु, क्षमा, विहायसा, दोषा, मुधा, मिथ्या। क्त्वातोसुन्कसुनः (ग० सू० ५), कृन्मकारान्तः सन्ध्यक्षरान्तः (ग० सू० ६), अव्ययीभावश्च (ग० सू० ७), पुरा, मिथो, मिथस्, प्रबाहुकम्, आर्यहलम्, अभीक्ष्णम्, साकम्, सार्द्धम्, समम्, नमस्, हिरुक्। तसिलादिस्तद्धित एधाच्पर्यन्तः (ग० सू० ८), शस्तसी (ग० सू० ९), कृत्वसुच् (ग० सू० १०), सुच् (ग० सू० ११), आस्थालौ (ग० सू० १२), च्व्यर्थाश्च (ग० सू० १३), अम् (ग० सू० १४), आम् (ग० सू० १५), प्रतान्, प्रशान्। स्वरादिः। निपाता वक्ष्यन्ते—'प्राग्रीश्वरान्निपाताः' (१.४.५६) इति। च, वा, ह, अह, एव, एवमित्यादयः। अव्ययप्रदेशाः—'अव्ययादाप्सुपः' (२.४.८२) इत्येवमादयः। अव्ययमित्यन्वर्थसंज्ञा।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ (गो० ब्रा० १.१.२६)

तद्धितश्चासर्वविभक्तिः ॥ ३८ ॥

तद्धितान्तः शब्दोऽसर्वविभक्तिरव्ययसंज्ञो भवति। यस्माद् न सर्वविभक्तेरुत्पत्तिः सोऽसर्वविभक्तिः। ततः। यतः। तत्र। यत्र। तदा। यदा। सर्वदा। सदा। तद्धित इति किम् ? एकः। द्वौ। बहवः। असर्वविभक्तिरिति किम् ? औपगवः, औपगवौ, औपगवाः॥

कृन्मेजन्तः ॥ ३९ ॥

कृद् यो मकारान्त एजन्तश्च तदन्तं शब्दरूपमव्ययसंज्ञं भवति। स्वादुंकारं भुङ्क्ते। सम्पन्नंकारं भुङ्क्ते। लवणंकारं भुङ्क्ते। एजन्तः—वक्षे रायः। ता वामेषे रथानाम् (ऋ० ५.६६.३)। क्रत्वे दक्षाय जीवसे (ऋ० १०.५७.४)। ज्योक् च सूर्यं दृशे (ऋ० १०.५७.४)। वक्षे इति वचेः 'तुमर्थे सेसेन०' (३.४.९) इति सेप्रत्यये कुत्वे षत्वे च कृते रूपम्। एषे इति इणः सेप्रत्यये गुणे षत्वे च कृते रूपम्। जीवसे इति जीवेरसेप्रत्यये रूपम्। दृशे इति दृशेः केन्प्रत्ययो निपात्यते—'दृशे विख्ये च' (३.४.११) इति। अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम्। इह मा भूत्—आधये, चिकीर्षवे, कुम्भकारेभ्य इति॥

क्त्वातोसुन्कसुनः ॥ ४० ॥

क्त्वा तोसुन् कसुन् इत्येवमन्तं शब्दरूपमव्ययसंज्ञं भवति। कृत्वा। हृत्वा। तोसुन्—पुरा सूर्यस्योदेतोराधेयः (काठ० सं० ८.३)। पुरा वत्सानामपाकर्तोः (काठ० सं० ३१.१५)। 'भावलक्षणे स्थेण्कृञ्वदि०' (३.४.१६) इति इणः कृञश्च तोसुन् प्रत्ययः। कसुन्—'सृपितृदोः कसुन्' (३.४.१७)—पुरा क्रूरस्य विसृपो विरप्शिन् (तै० सं० १.१.६.३)। पुरा जत्रुभ्य आतृदः (ऋ० ८.१.१२)॥

अव्ययीभावश्च ॥ ४१ ॥

अव्ययीभावसमासोऽव्ययसंज्ञो भवति। किं प्रयोजनम्? लुङ्मुखस्वरोपचाराः। लुक्—उपाग्नि। प्रत्यग्नि शलभाः पतन्ति। मुखस्वरः—उपाग्निमुखः। प्रत्यग्निमुखः। 'मुखं स्वाङ्गम्' (६.२.१६७) इत्युत्तरपदान्तोदात्तत्वं प्राप्तम्, 'नाव्ययदिक्छब्द०' (६.२.१६८) इति प्रतिषिध्यते। तस्मिन् प्रतिषिद्धे पूर्वपदप्रकृतिस्वर एव भवति। उपचारः—उपपयःकारः। उपपयःकामः। विसर्जनीयस्थानिकस्य सकारस्य उपचार इति संज्ञा। तत्राव्ययीभावस्याव्ययत्वे 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (८.३.४६) इति पर्युदासः सिद्धो भवति। सर्वमिदं काण्डं स्वरादावपि पठ्यते। पुनर्वचनमनित्यत्वज्ञापनार्थम्। तेनायं कार्यनियमः सिद्धो भवति। इह च पुरा सूर्यस्योदेतोराधेयः (काठ० सं० ८.३), पुरा क्रूरस्य विसृपो विरप्शिन् (तै० सं० १.१.६.३) इति 'न लोकाव्ययनिष्ठा०' (२.३.६९) इति षष्ठीप्रतिषेधो न भवति॥

शि सर्वनामस्थानम् ॥ ४२ ॥

शि इत्येतत् सर्वनामस्थानसंज्ञं भवति। किमिदं शि इति? 'जश्शसोः शिः' (७.१.२०) इति शिरादेशः। कुण्डानि तिष्ठन्ति। कुण्डानि पश्य। दधीनि। मधूनि। त्रपूणि। जतूनि। सर्वनामस्थानप्रदेशाः—'सर्वनामस्थाने चासंबुद्धौ' (६.४.८) इत्येवमादयः॥

सुडनपुंसकस्य ॥ ४३ ॥

सुडिति पञ्च वचनानि सर्वनामस्थानसंज्ञानि भवन्ति नपुंसकादन्यत्र। नपुंसके न विधिर्न प्रतिषेधः, तेन जसः शेः सर्वनामस्थानसंज्ञा पूर्वेण भवत्येव। राजा, राजानौ, राजानः। राजानम्, राजानौ। सुडिति किम्? राज्ञः पश्य। अनपुंसकस्येति किम्? सामनी। वेमनी॥

---

१ - 'जसंशे' इति बाल०।

न वेति विभाषा ॥ ४४ ॥

नेति प्रतिषेधो वेति विकल्पः, तयोः प्रतिषेधविकल्पयोर्विभाषेति संज्ञा भवति। इतिकरणोऽर्थनिर्देशार्थः। विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते। तत्र प्रतिषेधेन समीकृते विषये पश्चाद् विकल्पः प्रवर्तते। उभयत्रविभाषाः प्रयोजयन्ति। 'विभाषा श्वेः' (६.१.३०)—शुशाव, शिश्वाय। शुशुवतुः, शिश्वियतुः। विभाषाप्रदेशाः—'विभाषा श्वेः' (६.१.३०) इत्येवमादयः॥

इग् यणः सम्प्रसारणम् ॥ ४५ ॥

इग् यो यणः स्थाने भूतो भावी वा तस्य संप्रसारणमित्येषा संज्ञा भवति। यज्—इष्टम्। वप्—उप्तम्। ग्रह्—गृहीतम्। केचिदुभयथा सूत्रमिदं व्याचक्षते—वाक्यार्थः संज्ञी, वर्णश्चेति। इग्यण इति यो वाक्यार्थः स्थान्यादेशसम्बन्धलक्षणः स संप्रसारणसंज्ञो भवति, यण्स्थानिको य इग्वर्णः स संप्रसारणसंज्ञो भवतीति। तत्र विधौ वाक्यार्थ उपतिष्ठते। 'ष्यङः संप्रसारणम्' (६.१.१३), 'वसोः संप्रसारणम्' (६.४.१३१) इति। अनुवादे वर्णः, 'संप्रसारणाच्च' (६.१.१०८) इति। संख्यातानुदेशादिह न भवति—अदुहितरामिति। संप्रसारणप्रदेशाः—'वसोः संप्रसारणम्' (६.४.१३१) इत्येवमादयः॥

आद्यन्तौ टकितौ ॥ ४६ ॥

आदिष्टिद् भवति अन्तः किद् भवति षष्ठीनिर्दिष्टस्य। लविता। मुण्डो भीषयते। टित्प्रदेशाः—'आर्धधातुकस्येड् वलादेः' (७.२.३५) इत्येवमादयः। कित्प्रदेशाः—'भियो हेतुभये षुक्' (७.३.४०) इत्येवमादयः॥

मिदचोऽन्त्यात् परः ॥ ४७ ॥

अच इति निर्धारणे षष्ठी। जातौ चेदमेकवचनम्। अचां संनिविष्टानामन्त्यादचः परो मिद् भवति। स्थानेयोगप्रत्ययपरत्वस्यायमपवादः। विरुणद्धि। मुञ्चति। पयांसि। मित्प्रदेशाः—'रुधादिभ्यः श्नम्' (३.१.७८) इत्येवमादयः॥ मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम्॥ मग्नः। मग्नवान्। मङ्क्ता। मङ्क्तुम्॥

एच इग्घ्रस्वादेशे ॥ ४८ ॥

एचो ह्रस्वादेशे कर्तव्य इगेव ह्रस्वो भवति नान्यः। रै—अतिरि। नौ—अतिनु। गो—उपगु। एच इति किम्? अतिखट्वः। अतिमालः। ह्रस्वादेश इति किम्? देवदत्त। देवदत्त॥

---

१ - 'द्युभ्यामित्यत्र 'दिव उत्' (६.१.१३१) इति तपरकरणाद् दीर्घो न भवति' इति है० संस्करणेऽधिकः पाठः।

२ - 'अचः ..... एकवचनम्' इति पाठो न सार्वत्रिकः। ३ - 'देवदत्त। देवदत्त।' इत्यपपाठो मुद्रितेषु।

षष्ठी स्थानेयोगा ॥ ४९ ॥

परिभाषेयं योगनियमार्था। इह शास्त्रे या षष्ठी अनियतयोगा श्रूयते, सा स्थानेयोगैव भवति नान्ययोगा। स्थानेयोगस्य निमित्तभूते सति सा प्रतिपत्तव्या। स्थानशब्दश्च प्रसङ्गवाची। यथा दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति दर्भाणां प्रसङ्ग इति गम्यते। एवमिहापि अस्तेः स्थाने प्रसङ्गे भूर्भवति। भविता। भवितुम्। भवितव्यम्। ब्रुवः प्रसङ्गे वचिर्भवति। वक्ता। वक्तुम्। वक्तव्यम्। प्रसङ्गे सम्बन्धस्य निमित्तभूते ब्रुव इति षष्ठी। बहवो हि षष्ठ्यर्थाः स्वस्वाम्यनन्तरसमीपसमूहविकारावयवाद्याः। तत्र यावन्तः शब्दे संभवन्ति तेषु सर्वेषु प्राप्तेषु नियमः क्रियते षष्ठी स्थानेयोगेति। स्थाने योगोऽस्या इति व्यधिकरणो बहुव्रीहिः। अत एव निपातनाच्च सप्तम्या अलुक्॥

स्थानेऽन्तरतमः ॥ ५० ॥

स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति सदृशतमः। कुतश्च शब्दस्यान्तर्यम्? स्थानार्थगुणप्रमाणतः। स्थानतः—'अकः सवर्णे दीर्घः' (६.१.१०१)—दण्डाग्रम्। यूपाग्रम्। द्वयोरकारयोः कण्ठ्य एव दीर्घ आकारो भवति। अर्थतः—वतण्डी चासौ युवतिश्च वातण्ड्ययुवतिः। पुंवद्भावेनान्तरतमः पुंशब्दोऽतिदिश्यते। गुणतः—पाकः। त्यागः। रागः। 'चजोः कु घिण्ण्यतोः' (७.३.५२) इति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारो भवति, जकारस्य घोषवतोऽल्पप्राणस्य तादृश एव गकारः। प्रमाणतः—अमुष्मै। अमूभ्याम्। 'अदसोऽसेर्दादु दो मः' (८.२.८०) इति ह्रस्वस्य ह्रस्वः, दीर्घस्य दीर्घः। स्थान इति वर्तमाने पुनः स्थानेग्रहणं किम्? यत्रानेकमान्तर्यं संभवति तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात्। चेता। स्तोता। प्रमाणतोऽकारो गुणः प्राप्तः, तत्र स्थानत आन्तर्यादेकारौकारौ भवतः। तमब्ग्रहणं किम्? वाग् घसति। त्रिष्टुब् भसति। 'झयो होऽन्यतरस्याम्' (८.४.६२) इति हकारस्य पूर्वसवर्णे क्रियमाणे सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ताः, नादवतो नादवन्त इति तृतीयाः, तमब्ग्रहणाद् ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः॥

उरण् रपरः ॥ ५१ ॥

उः स्थानेऽण् प्रसज्यमान एव रपरो वेदितव्यः। कर्ता। हर्ता। किरति। गिरति। द्वैमातुरः। त्रैमातुरः। उरिति किम्? खेयम्। गेयम्। अण्ग्रहणं किम्? 'सुधातुरकङ् च' (४.१.९७)—सौधातकिः॥

अलोऽन्त्यस्य ॥ ५२ ॥

षष्ठीनिर्दिष्टस्य य उच्यत आदेशः, सोऽन्त्यस्यालः स्थाने वेदितव्यः। 'इद् गोण्याः' (१.२.५०)—पञ्चगोणिः। दशगोणिः॥

ङिच्च ॥ ५३ ॥

ङिच्च य आदेशः, सोऽनेकालपि अलोऽन्त्यस्य स्थाने भवति। 'आनङ् ऋतो द्वन्द्वे' (६.३.२५)—होतापोतारौ। मातापितरौ। तातङि ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वात् सर्वादेशस्तातङ् भवति। जीवतादु भवान्। जीवतात् त्वम्॥

आदेः परस्य ॥ ५४ ॥

परस्य कार्यं शिष्यमाणमादेरलः प्रत्येतव्यम्। क्व च परस्य कार्यं शिष्यते ? यत्र पञ्चमीनिर्देशः। तद् यथा—'ईदासः' (७.२.८३)—आसीनो यजते। 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (६.३.९७)—द्वीपम्। अन्तरीपम्। प्रतीपम्। समीपम्॥

अनेकाल्शित् सर्वस्य ॥ ५५ ॥

अनेकाल् य आदेशः शिच् च, स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति। 'अस्तेर्भूः' (२.४.५२)—भविता। भवितुम्। भवितव्यम्। शित् खल्वपि—'जश्शसोः शिः' (७.१.२०)—कुण्डानि तिष्ठन्ति। कुण्डानि पश्य॥

स्थानिवदादेशोऽनल्विधौ ॥ ५६ ॥

स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयं कार्यमादेशे न प्राप्नोतीत्ययमतिदेश आरभ्यते। स्थानिना तुल्यं वर्तत इति स्थानिवत्। स्थानिवदादेशो भवति स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु, स्थान्यलाश्रयाणि कार्याणि वर्जयित्वा। न अल्विधिरनल्विधिरित्यर्थः। किमुदाहरणम्? धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः। धात्वादेशो धातुवद् भवति। 'अस्तेर्भूः' (२.४.५२)। 'ब्रुवो वचिः' (२.४.५३)। आर्धधातुके विषये प्रागेवादेशेषु कृतेषु 'धातोः' (३.१.९१) इति तव्यादयो भवन्ति। भविता। भवितुम्। भवितव्यम्। वक्ता। वक्तुम्। वक्तव्यम्। अङ्गादेशोऽङ्गवद् भवति। केन, काभ्याम्, कैः। 'किमः कः' (७.२.१०३) इति कादेशे कृतेऽङ्गाश्रया इनदीर्घत्वैस्भावा भवन्ति। कृदादेशः कृद्वद् भवति। प्रकृत्य। प्रहृत्य। क्त्वो ल्यबादेशे कृते 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुग् भवति। तद्धितादेशस्तद्धितवद् भवति। दाधिकम्। अद्यतनम्। 'कृत्तद्धितसमासाश्च' (१.२.४६) इति प्रातिपदिकसंज्ञा भवति। अव्ययादेशोऽव्ययवद् भवति।

---

१ - ' अनल्विधिरनेकाल्विधिरित्यर्थः' इति बाल०। २ - ' प्रयोजनम् ' इत्यधिकम्—न्या०, पद०।

प्रस्तुत्य। उपहृत्य। उपस्तुत्य। 'अव्ययात्०' (२.४.८२) इति सुब्लुग् भवति। सुबादेशः सुब्वद् भवति। वृक्षाय। प्लक्षाय। 'सुपि च' (७.३.१०२) इति दीर्घत्वं भवति। तिङादेशस्तिङ्वद् भवति। अकुरुताम्। अकुरुतम्। 'सुप्तिङन्तं पदम्' (१.४.१४) इति पदसंज्ञा भवति। पदादेशः पदवद् भवति। ग्रामो वः स्वम्। जनपदो नः स्वम्। 'पदस्य' (८.१.१६) इति रुत्वं भवति। वत्करणं किम् ? स्थानी आदेशस्य संज्ञा मा विज्ञायीति, स्वाश्रयमपि यथा स्यात्। 'आङो यमहनः' (१.३.२८)—आहत, आवधिष्ट इत्यात्मनेपदमुभयत्रापि भवति। आदेशग्रहणं किम् ? आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो यथा स्यात्। पचतु। 'एरुः' (३.४.८६)। अनल्विधाविति किम् ? द्युपथित्यदादेशा न स्थानिवद् भवन्ति। द्यौः। पन्थाः। स इति। 'हल्ङ्याब्भ्यः०' (६.१.६८) इति सुलोपो न भवति॥

अचः परस्मिन् पूर्वविधौ ॥ ५७ ॥

पूर्वेणानल्विधौ स्थानिवद्भाव उक्तः। अल्विध्यर्थमिदमारभ्यते। आदेशः स्थानिवद् इति वर्तते। अच इति स्थानिनिर्देशः। परस्मिन्निति निमित्तसप्तमी। पूर्वविधाविति विषयसप्तमी। अजादेशः परनिमित्तकः पूर्वविधौ कर्तव्ये स्थानिवद् भवति। पटयति। अवधीत्। बहुखट्वकः। पटुमाचष्ट इति णिचि टिलोपे कृते तस्य स्थानिवद्भावाद् 'अत उपधायाः' (७.२.११६) इति वृद्धिर्न भवति। अवधीत्। अतो लोपस्य स्थानिवद्भावाद् 'अतो हलादेर्लघोः' (७.२.७) इति हलन्तलक्षणा वृद्धिर्न भवति। बहुखट्वक इति 'आपोऽन्यतरस्याम्' (७.४.१५) इति ह्रस्वस्य स्थानिवद्भावाद् 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' (६.२.१७४) इति स्वरो न भवति। अच इति किम् ? प्रश्नः। आक्राष्टाम्। आगत्य। प्रश्न इति प्रच्छेर्नङ्प्रत्यये 'च्छ्वोः शूडनुनासिके च' (६.४.१९) इति छकारस्य शकारः परनिमित्तकस्तुकि न स्थानिवद् भवति। आक्राष्टामिति 'झलो झलि' (८.२.२६) इति सिचो लोपः परनिमित्तकः कृषेः षकारस्य 'षढोः कः सि' (८.२.४१) इति ककारे कर्तव्ये न स्थानिवद् भवति। आगत्येति 'वा ल्यपि' (६.४.३८) इत्यनुनासिकलोपः परनिमित्तकस्तुकि कर्तव्ये न स्थानिवद् भवति। परस्मिन्निति किम् ? युवजानिः। वधूटीजानिः। वैयाघ्रपद्यः। आदीध्ये। युवजानिरिति 'जायाया निङ्' (५.४.१३४) न परनिमित्तकस्तेन यलोपे न स्थानिवद् भवति। वैयाघ्रपद्य इति न परनिमित्तकः पादस्यान्त-लोपः पद्भावं न प्रतिबध्नाति। आदीध्ये इति दीधीङ उत्तमपुरुषैकवचने टेरेत्वस्यापर-निमित्तकत्वाद् 'यीवर्णयोर्दीधीवेव्योः' (७.४.५३) इति लोपो न भवति। पूर्वविधाविति किम् ? हे गौः। बाभ्रवीयाः। नैधेयः। हे गौरिति वृद्धिरजादेशः सम्बुद्धिलोपे कर्तव्ये न स्थानिवद् भवति। बाभ्रवीया इति बाभ्रव्यस्यामीच्छात्रा इति 'वृद्धाच्छः' (४.२.११४) इति छः। 'हलस्तद्धितस्य' (६.४.१५०) इति यकारलोपे कर्तव्येऽवादेशो न स्थानिवद्

भवति। नैधेयः। 'आतो लोप इटि च' (६.४.६४) इत्याकारलोप 'इतश्चानिञः' (४.१.१२२) इति ङ्यञूलक्षणे प्रत्ययविधौ न स्थानिवद् भवति॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ ५८॥

पूर्वेणातिप्रसक्तः स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते। पदान्तविधिं प्रत्यजादेशो न स्थानिवद् भवति। कौ स्तः। यौ स्तः। तानि सन्ति। यानि सन्ति। 'श्नसोरल्लोपः' (६.४.१११) ङिति सार्वधातुक इति परनिमित्तकः, स पूर्वविधावावादेशे यणादेशे च कर्तव्ये स्थानिवत् स्यात्, अस्माद् वचनाद् न भवति। द्विर्वचनविधिं प्रति [अजादेशः] न स्थानिवद् भवति। दद्ध्यत्र। मद्ध्वत्र। यणादेशः परनिमित्तकः, तस्य स्थानिवद्भावाद् 'अनचि च' (८.४.४७) इति धकारस्य द्विर्वचनं न स्यादस्माद् वचनाद् भवति। वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद् भवति। अप्सु यायावरः प्रवपेत पिण्डान्। यातेर्यङन्ताद् 'यश्च यङः' (३.२.१७६) इति वरचि कृते 'अतो लोपः' (६.४.४८) परनिमित्तकः, तस्य स्थानिवत्त्वाद् 'आतो लोप इटि च' (६.४.६४) इत्याकारलोपः स्याद्, अस्माद् वचनाद् न भवति। यलोप—यलोपविधिं प्रत्यजादेशो न स्थानिवद् भवति। कण्डूतिः। कण्डूयतेः क्तिचि कृते 'अतो लोपः' (६.४.४८) परनिमित्तको 'लोपो व्योर्वलि' (६.१.६६) इति यलोपे स्थानिवत् स्याद्, अस्माद् वचनाद् न भवति। स्वर—स्वरविधिं प्रत्यजादेशो न स्थानिवद् भवति। चिकीर्षकः। जिहीर्षकः। ण्वुलि कृते 'अतो लोपः' (६.४.४८) परनिमित्तको 'लिति' (६.१.१९३) प्रत्ययात् पूर्वमुदात्तमिति स्वरे कर्तव्ये न स्थानिवद् भवतीति। सवर्ण—सवर्णविधिं प्रत्यजादेशो न स्थानिवद् भवति। शिण्ढि। पिण्ढि। शिषेः पिषेश्च लोण्मध्यमपुरुषैकवचने 'रुधादिभ्यः श्नम्' (३.१.७८) हित्वधित्वष्टुत्वजश्त्वेषु कृतेषु 'श्नसोरल्लोपः' (६.४.१११) ङिति सार्वधातुके परनिमित्तकः, अनुस्वारस्य ययि परसवर्णे (८.४.५८) कर्तव्ये न स्थानिवद् भवति। अनुस्वार—अनुस्वारविधिं प्रत्यजादेशो न स्थानिवद् भवति। शिंषन्ति। पिंषन्ति। 'नश्चापदान्तस्य झलि' (८.३.२४) इत्यनुस्वारे कर्तव्ये 'श्नसोरल्लोपः' (६.४.१११) न स्थानिवद् भवति। दीर्घ—दीर्घविधिं प्रत्यजादेशो न स्थानिवद् भवति। प्रतिदीव्ना। प्रतिदीव्ने। प्रतिदिवन्त्येतस्य 'भस्य' (६.४.१२९) इत्यधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च 'अल्लोपोऽनः' (६.४.१३४) इत्यकारलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद् 'हलि च' (८.२.७७) इति दीर्घत्वं न स्यात्, न ह्ययं वकारो हल्पर इति, अस्माद् वचनाद् भवति। जश्—जश्विधिं प्रत्यजादेशो न स्थानिवद् भवति। सग्धिश्च मे॒ सपीतिश्च मे (मा० सं० १८.६)। ब॒ब्धां ते॒ हरी॑ धा॒नाः (नि० ५.१२)। अदेः क्तिनि 'बहुलं छन्दसि' (२.४.३९) इति घस्लादेशः, 'घसिभसोर्हलि च' (६.४.१००) इत्युपधालोपः, 'झलो

---

१ – 'क्तिनि' इति है०, स चायुक्तः।

झलि' (८.२.२६) इति सकारलोपः, 'झषस्तथोर्धोऽधः' (८.२.४०) इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि' (८.४.५३) इति घकारस्य जश्त्वं न स्याद्, अस्माद् वचनाद् भवति। समाना ग्धिः, समानस्य सभावः। सग्धिः। बब्धामिति। भसेर्लोड्द्विवचने शपः श्लुः, द्विर्वचनम्, अभ्यासकार्यम्, 'घसिभसोर्हलि च' (६.४.१००) इत्युपधालोपः, 'झलो झलि' (८.२.२६) इति सकारलोपः, 'झषस्तथोर्धोऽधः' (८.२.४०) इति धत्वम्। उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि' (८.४.५३) इति भकारस्य जश्त्वं न स्याद्, अस्माद् वचनाद् भवति। चर्—चर्विधिं प्रत्यजादेशो न स्थानिवद् भवति। जक्षतुः। जक्षुः। अक्षन्[1] पितरोऽमीमदन्त पितरः (मा० सं० १९. ३६)। लिड्द्विवचनबहुवचनयोरदेर्घस्लादेशः, 'गमहनजनखनघसाम्०' (६.४.९८) इत्युपधालोपः, द्विर्वचनम्, अभ्यासकार्यम्। तत्रोपधालोपस्य स्थानिवत्त्वात् 'खरि च' (८.४.५५) इति घकारस्य चर्त्वं न स्याद्, अस्माद् वचनाद् भवति। 'शासिवसिघसीनां च' (८.३.६०) इति षत्वम्। अक्षन्नित्यदेर्लुङ्बहुवचने घस्लादेशः, च्लेरागतस्य 'मन्त्रे घसह्वर०' (२.४.८०) इति लुक्। 'गमहनजनखनघसाम्०' (६.४.९८) इत्युपधालोपः, तस्य स्थानिवत्त्वात् 'खरि च' (८.४.५५) इति चर्त्वं न स्याद्, अस्माद् वचनाद् भवति॥ स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद् भवति॥ अन्यस्तु स्थानिवदेव। तेन बहुखट्वकः, किर्योः, गिर्योः, वाय्वोरिति स्थानिवत्त्वात् स्वरदीर्घयलोपा न भवन्ति॥

द्विर्वचनेऽचि ॥ ५९ ॥

द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवद् भवति द्विर्वचन एव कर्तव्ये। रूपातिदेशश्चायं नियतकालः। तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते। आल्लोपोपधालोपणिलोपयणयवायावादेशाः प्रयोजनम्। आल्लोपः—पपतुः, पपुः। 'आतो लोप इटि च' (६.४.६४) इत्याकारलोपे कृते तस्य स्थानिवद्भावाद् 'एकाचो०' (६.१.१) इति द्विर्वचनं भवति। उपधालोपः—जघ्नतुः, जघ्नुः। 'गमहनजनखनघसाम्०' (६.४.९८) इत्युपधालोपे कृतेऽनच्कत्वाद् द्विर्वचनं न स्यात्, अस्माद् वचनाद् भवति। णिलोपः—आटिटत्। अटतेर्णिचि लुङि चङि णिलोपे कृते तस्य स्थानिवत्त्वाद् 'अजादेर्द्वितीयस्य' (६.१.२) इति टिशब्दस्य द्विर्वचनं भवति। यण्—चक्रतुः, चक्रुः। करोतेरतुसि उसि च यणादेशे कृतेऽनच्कत्वाद् द्विर्वचनं न स्यात्, स्थानिवत्त्वाद् भवति। अयवायावादेशाः—निनय। निनाय। लुलव। लुलाव। नयतेर्लुनातेश्चोत्तमे णलि गुणे कृते वृद्धौ चायवायावादेशाः, तेषां स्थानिवत्त्वाद् नेनैलोलाविति द्विर्वचनं भवति। द्विर्वचने कर्तव्य इति किम्?

---

१ - ' अन्यत्र ' इति है०, ' अन्यत्र तु ' इति बाल० तारा०।

जग्ले। मम्ले। श्रवणमाकारस्य न भवति। द्विर्वचननिमित्त इति किम्? दुद्यूषति। ऊठि यणादेशो न स्थानिवद् भवति। अचीति किम्? जेघ्रीयते। देध्मीयते। 'ई घ्राध्मोः' (७.४.३१) 'यङि च' (७.४.३०) इतीकारादेशः, तस्य स्थानिवद्भावादाकारस्य द्विर्वचनं स्यात्, अज्ग्रहणाद् न भवति॥

अदर्शनं लोपः ॥ ६० ॥

अदर्शनम्, अश्रवणम्, अनुच्चारणम्, अनुपलब्धिः, अभावः, वर्णविनाश इत्यनर्थान्तरम्। एतैः शब्दैर्योऽर्थोऽभिधीयते, तस्य लोप इतीयं संज्ञा भवति। अर्थस्येयं संज्ञा न शब्दस्य। प्रसक्तस्यादर्शनं लोपसंज्ञं भवति। 'गोधाया ढ्रक्' (४.१.१२६)—गौधेरः। पचेरन्। 'जीवे रदानुक्' (द० उ० १.१६३)—जीरदानुः। स्निवेर्मनिन्—आस्नेमाणम्। यकार-वकारयोरदर्शनमिहोदाहरणम्। अपरस्यानुबन्धादेः प्रसक्तस्य। लोपप्रदेशाः—'लोपो व्योर्वलि' (६.१.६६) इत्येवमादयः॥

प्रत्ययस्य लुक्श्लुलुपः ॥ ६१ ॥

अदर्शनमिति वर्तते। प्रत्ययादर्शनस्य लुक्, श्लु, लुप् इत्येताः संज्ञा भवन्ति। अनेकसंज्ञाविधानाच् च तद्भावितग्रहणमिह विज्ञायते। लुक्संज्ञाभावितं प्रत्ययादर्शनं लुक्संज्ञं भवति, श्लुसंज्ञाभावितं श्लुसंज्ञं भवति, लुप्संज्ञाभावितं लुप्संज्ञं भवति। तेन संज्ञानां संकरो न भवति। विधिप्रदेशेषु च भाविनी संज्ञा विज्ञायते। अत्ति। जुहोति। वरणाः। प्रत्ययग्रहणं किम्? अगस्तयः। कुण्डिनाः। लुक्श्लुलुप्प्रदेशाः—'लुक् तद्धित- लुकि' (१.२.४६), 'जुहोत्यादिभ्यः श्लुः' (२.४.७५), 'जनपदे लुप्' (४.२.८१) इत्येवमादयः॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ ६२ ॥

प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं नु नाम स्यादिति सूत्रमिदमारभ्यते। प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्यं भवति। अग्निचित्, सोमसुत्, अधोगित्यत्र सुप्तिङोर्लुप्तयोः 'सुप्तिङन्तं पदम्' (१.४.१४) इति पदसंज्ञा भवति। अधोगिति दुहेर्लडि तिपि शब्लुकि तिलोपे घत्वभष्भावजश्त्वचर्त्वेषु कृतेषु रूपम्। प्रत्यय इति वर्तमाने पुनः प्रत्ययग्रहणं किम्? कृत्स्नप्रत्ययलोपे यथा स्यात्। इह मा भूत्—आघ्नीय। सङ्ग्मीय। हनिगम्योर्लिङात्मनेपदे 'लिङः सलोपोऽनन्त्यस्य' (७.२.७९) इति सीयुट्सकारलोपः प्रत्ययैकदेशलोपः, तत्र प्रत्ययलक्षणेन झलि (६.४.३७) इत्यनुनासिकलोपो न भवति। प्रत्ययलक्षणमिति किम्? रायः कुलं रैकुलम्। गवे हितं गोहितम्। आयवादेशौ न भवतो वर्णाश्रयत्वात्॥

न लुमताङ्गस्य ॥ ६३ ॥

पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते। लुमता शब्देन लुप्ते प्रत्यये यदङ्गम्, तस्य प्रत्ययलक्षणं कार्यं न भवति। गर्गाः। मृष्टः। जुहुतः। यञ्शपोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः। लुमतेति किम् ? कार्यते। हार्यते। अङ्गस्येति किम्? पञ्च। सप्त। पयः। साम॥

अचोऽन्त्यादि टि ॥ ६४ ॥

अच इति निर्धारणे षष्ठी। जातावेकवचनम्। अचां संनिविष्टानां योऽन्त्योऽच्, तदादि शब्दरूपं टिसंज्ञं भवति। अग्निचित्—इच्छब्दः। सोमसुत्—उच्छब्दः। आताम्, आथाम्—आम्शब्दः। पचेते। पचेथे। टिप्रदेशाः—'टित आत्मनेपदानां टेरे' (३.४.७९) इत्येवमादयः॥

अलोऽन्त्यात् पूर्व उपधा ॥ ६५ ॥

धात्वादौ वर्णसमुदायेऽन्त्यादलः पूर्वो यो वर्णः, सोऽलेवोपधासंज्ञो भवति। पच्, पठ्—अकारः। भिद्, छिद्—इकारः। बुध्, युध्—उकारः। वृत्, वृध्—ऋकारः। अल इति किम् ? शिष्टः। शिष्टवान्। समुदायात् पूर्वस्य मा भूत्। उपधाप्रदेशाः—'अत उपधायाः' (७.२.११६) इत्येवमादयः॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ ६६ ॥

तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति, नोत्तरस्य। 'इको यणचि' (६.१.७७)—दध्युदकम्। मध्विदम्। पचत्योदनम्। निर्दिष्टग्रहणमानन्तर्यार्थम्। अग्निचिदत्रेति व्यवहितस्य मा भूत्॥

तस्मादित्युत्तरस्य ॥ ६७ ॥

निर्दिष्टग्रहणमनुवर्तते। तस्मादिति पञ्चम्यर्थनिर्देश उत्तरस्यैव कार्यं भवति, न पूर्वस्य। 'तिङ्ङतिङः' (८.१.२८)—ओदनं पचति। इह न भवति—पचत्योदनम् इति॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ ६८ ॥

शास्त्रे स्वमेव रूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति, न बाह्योऽर्थः, शब्दसंज्ञां वर्जयित्वा। शब्देनार्थावगतेरर्थे कार्यस्यासंभवात् तद्वाचिनां शब्दानां संप्रत्ययो मा भूदिति सूत्रमिदमारभ्यते। 'अग्नेर्ढक्' (४.२.३३)—आग्नेयमष्टाकपालं निर्वपेत् (वै० श्रौ०

१.१६)। अग्निशब्दोऽग्निशब्दस्यैव ग्राहको भवति, न ज्वलनः पावको धूमकेतुरिति, नातः प्रत्ययो भवति। 'उदश्वितोऽन्यतरस्याम्' (४.२.१६)—औदश्वित्कम्। औदश्वितम्। तक्रमरिष्टं कालशेयं दण्डाहतं मथितमिति नातः प्रत्ययो भवति। अशब्दसंज्ञेति किम्? 'दाधा घ्वदाप्' (१.१.२०), 'तरप्तमपौ घः' (१.१.२२) घुग्रहणेषु घग्रहणेषु च संज्ञिनां ग्रहणम्, न संज्ञायाः॥ **सित्तद्विशेषाणां वृक्षाद्यर्थम्॥** सिन्निर्देशः कर्तव्यः। ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति। किं प्रयोजनम्? वृक्षाद्यर्थम्। 'विभाषा वृक्षमृगतृण०' (२.४.१२) इति। प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः॥ **पित्पर्यायवचनस्य च स्वाद्यर्थम्॥** पिन्निर्देशः कर्तव्यः। ततो वक्तव्यं पर्यायवचनस्य ग्रहणं भवति, चकारात् स्वस्य रूपस्य तद्विशेषाणां चेति। किं प्रयोजनम्? स्वाद्यर्थम्। 'स्वे पुषः' (३.४.४०)—स्वपोषं पुष्टः। रैपोषम्। धनपोषम्। अश्वपोषम्। गोपोषम्॥ **जित्पर्यायवचनस्यैव राजाद्यर्थम्॥** जिन्निर्देशः कर्तव्यः। ततो वक्तव्यं पर्यायवचनस्यैव ग्रहणं भवतीति, न स्वरूपस्य, नापि तद्विशेषाणाम्। किं प्रयोजनम्? राजाद्यर्थम्। 'सभा राजामनुष्यपूर्वा' (२.४.२३)—इनसभम्। ईश्वरसभम्। तस्यैव न भवति—राजसभा। तद्विशेषाणां च न भवति—पुष्यमित्रसभा। चन्द्रगुप्तसभा॥ **झित्तद्विशेषाणां च मत्स्याद्यर्थम्॥** झिन्निर्देशः कर्तव्यः। ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति। किं प्रयोजनम्? मत्स्याद्यर्थम्। 'पक्षिमत्स्यमृगान् हन्ति' (४.४.३५) इति ठक्। पाक्षिकः। मात्स्यिकः। तद्विशेषाणाम्—शाकुनिकः। पर्यायाणां न भवति—अजिह्मान् हन्ति। अनिमिषान् हन्तीति। अथैकस्येष्यते। मीनान् हन्ति मैनिकः॥

अणुदित् सवर्णस्य चाप्रत्ययः॥ ६९॥

परेण णकारेण प्रत्याहारग्रहणम्। अण् गृह्यमाण उदिच्च सवर्णानां ग्राहको भवति, स्वस्य च रूपस्य, प्रत्ययं वर्जयित्वा। 'आद् गुणः' (६.१.८७)। 'अस्य च्वौ' (७.४.३२)। 'यस्येति च' (६.४.१४८)। स्वरानुनासिक्यकालभिन्नस्य ग्रहणं भवति। उदित् खल्वपि—'चुटू' (१.३.७), 'लशक्वतद्धिते' (१.३.८) चवर्गटवर्गयोः कवर्गस्य च ग्रहणं भवति। अप्रत्यय इति किम्? 'सनाशंसभिक्ष उः' (३.२.१६८)। 'अ साम्प्रतिके' (४.३.६)। दीर्घो न भवति॥

तपरस्तत्कालस्य॥ ७०॥

तः परो यस्मात् सोऽयं तपरः, तादपि परस्तपरः। तपरो वर्णस्तत्कालस्यात्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति, स्वस्य च रूपस्य। विध्यर्थमिदम्। अणिति नानुवर्तते। अणामन्येषां च तपराणाम् इदमेव ग्रहणकशास्त्रम्। 'अतो भिस ऐस्' (७.१.६) इत्येवमादिषु पूर्वग्रहणकशास्त्रं न प्रवर्तत एव। अतपरा अणस्तस्यावकाशः।

किमुदाहरणम् ? 'अतो भिस ऐस्' (७.१.९)—वृक्षैः। प्लक्षैः। 'विड्वनोरनुनासिकस्यात्' (६.४.४१)—अब्जाः। गोजाः। तत्कालस्येति किम् ? खट्वाभिः। मालाभिः॥

आदिरन्त्येन सहेता ॥ ७१ ॥

आदिरन्त्येनेत्संज्ञकेन सह गृह्यमाणस्तन्मध्यपतितानां वर्णानां ग्राहको भवति, स्वस्य च रूपस्य। अण्। अक्। अच्। हल्। सुप्। तिङ्। अन्त्येनेति किम्? सुडिति तृतीयैकवचनेन टा इत्यनेन ग्रहणं मा भूत्॥

येन विधिस्तदन्तस्य ॥ ७२ ॥

येन विशेषणेन विधिर्विधीयते स तदन्तस्यात्मान्तस्य समुदायस्य ग्राहको भवति, स्वस्य च रूपस्य। 'एरच्' (३.३.५६)—इवर्णान्तादच्प्रत्ययो भवति। चयः। जयः। अयः। 'ओरावश्यके' (३.१.१२५)—उवर्णान्ताद् ण्यत् भवति। अवश्यलाव्यम्। अवश्यपाव्यम् ॥ समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः ॥ द्वितीयान्तं श्रितादिभिः सह समस्यते। कष्टश्रितः। इह मा भूत्—कष्टं परमश्रित इति। प्रत्ययविधौ—'नडादिभ्यः फक्' (४.१.९९)। नडस्यापत्यं नाडायनः। इह मा भूत्—सूत्रनडस्यापत्यं सौत्रनाडिः। किमविशेषेण ? नेत्याह ॥ उगिद्वर्णग्रहणवर्जमिति वाच्यम्॥ 'उगितश्च' (४.१.६) इति ङीप्प्रत्ययस्तदन्तादपि भवति। भवती। अतिभवती। वर्णग्रहणम्—'अत इञ्' (४.१.९५)—दाक्षिः। प्लाक्षिः ॥ यस्मिन् विधिस्तदादावल्ग्रहणे ॥ अल्ग्रहणेषु यस्मिन् विधिस्तदादाविति वक्तव्यम्। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६.४.७७) इति। श्रियः। भ्रुवः॥

वृद्धिर्यस्याचामादिस्तद् वृद्धम् ॥ ७३ ॥

यस्येति समुदाय उच्यते। अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतः तच्छब्दरूपं वृद्धसंज्ञं[1] भवति। अचामिति जातौ बहुवचनम्। शालीयः। मालीयः। औपगवीयः। कापटवीयः। आदिरिति किम् ? सभासन्नयने भवः साभासन्नयनः ॥ वा नामधेयस्य वृद्धसंज्ञा वक्तव्या॥ देवदत्तीयाः, दैवदत्ताः ॥ गोत्रान्तादसमस्तवत् प्रत्ययो भवतीति वक्तव्यम्॥ घृतप्रधानो रौढिः, घृतरौढिः। तस्य छात्रा घृतरौढीयाः। ओदनप्रधानः पाणिनिः, ओदनपाणिनिः। तस्य छात्रा ओदनपाणिनीयाः। वृद्धाम्भीयाः। वृद्धकाश्यपीयाः ॥ जिह्माकात्यहरितकात्यवर्जम्॥ जैह्माकाताः। हारितकाताः॥

---

१ - 'संज्ञा' इति न्या०, पद०।

त्यदादीनि च ॥ ७४ ॥

यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते। इह तु न संबध्यते। त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवन्ति। त्यदीयम्। तदीयम्। एतदीयम्। इदमीयम्। अदसीयम्। त्वदीयम्। त्वादायनिः। मदीयम्। मादायनिः। भवदीयम्। किमीयम्॥

एङ् प्राचां देशे ॥ ७५ ॥

यस्याचामादिग्रहणमनुवर्तते। एङ् यस्याचामादिस्तत् प्राचां देशाभिधाने वृद्धसंज्ञं भवति। एणीपचनीयः। भोजकटीयः। गोनर्दीयः। एङिति किम् ? आहिच्छत्रः। कान्यकुब्जः। प्राचामिति किम् ? देवदत्तो नाम वाहीकेषु ग्रामः। तत्र भवो दैवदत्तः। देश इति किम् ? गोमत्यां भवा मत्स्या गौमताः।

प्रागुदञ्चौ विभजते हंसः क्षीरोदकं यथा।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य प्रथमः पादः॥

—o—

॥ प्रथमाध्यायस्य द्वितीयः पादः ॥

गाङ्कुटादिभ्योऽञ्णिन् ङित् ॥ १ ॥

अतिदेशोऽयम्। गाङिति इङादेशो गृह्यते, न 'गाङ् गतौ' (भ्वा० ६८१) इति, ङकारस्यानन्यार्थत्वात्। कुटादयोऽपि 'कुट कौटिल्ये' (तुदा० ७५) इत्येतदारभ्य यावत् 'कुङ् शब्दे' (तुदा० १११) इति। एभ्यो गाङ्कुटादिभ्यः परेऽञ्णितः प्रत्यया ङितो भवन्ति, ङिद्वद् भवन्तीत्यर्थः। गाङः—अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत। कुटादिभ्यः—उत्कुटिता। उत्कुटितुम्। उत्कुटितव्यम्। उत्पुटिता। उत्पुटितुम्। उत्पुटितव्यम्। अञ्णिदिति किम् ? उत्कोटयति। उच्चुकोट। उत्कोटकः। उत्कोटो वर्तते॥ व्यचेः कुटादित्वमनसीति वक्तव्यम्॥ विचिता। विचितुम्। विचितव्यम्। अनसीति किम्? उरुव्यचाः॥

---

१ – ' क्षीरोदके ' इति है० अन्यत्र च मुद्रितेषु।

विज इट् ॥ २ ॥

'ओविजी भयचलनयोः' (तुदा० ६) अस्मात् पर इडादिः प्रत्ययो ङिद्वद् भवति। उद्विजिता। उद्विजितुम्। उद्विजितव्यम्। इडिति किम् ? उद्वेजनम्। उद्वेजनीयम्॥

विभाषोर्णोः ॥ ३ ॥

इडिति वर्तते। 'ऊर्णुञ् आच्छादने' (अदा० ३२) अस्मात् पर इडादिः प्रत्ययो विभाषा ङिद्वद् भवति। प्रोर्णुविता, प्रोर्णविता। इडित्येव—प्रोर्णवनम्। प्रोर्णवनीयम्॥

सार्वधातुकमपित् ॥ ४ ॥

सार्वधातुकं यदपित् तद् ङिद्वद् भवति। कुरुतः, कुर्वन्ति। चिनुतः, चिन्वन्ति। सार्वधातुकमिति किम्? कर्ता। कर्तुम्। कर्तव्यम्। अपिदिति किम्? करोति। करोषि। करोमि॥

असंयोगाल्लिट् कित् ॥ ५ ॥

अपिदिति वर्तते। असंयोगान्ताद् धातोः परो लिट् प्रत्ययोऽपित् किद् भवति। बिभिदतुः, बिभिदुः। चिच्छिदतुः, चिच्छिदुः। ईजतुः, ईजुः। असंयोगादिति किम्? सस्रंसे। दध्वंसे। अपिदित्येव—बिभेदिथ ॥

इन्धिभवतिभ्यां च ॥ ६ ॥

इन्धिभवतीत्येताभ्यां परो लिट् प्रत्ययः किद् भवति। समीधे दस्युहन्तमम् (ऋ० ६.१६.१५)। पुत्र ईधे[1] अथर्वणः (ऋ० ६.१६.१४)। भवतेः खल्वपि—बभूव। बभूविथ। इन्धेः संयोगार्थं ग्रहणम्। भवतेः पिदर्थम्। अत्रेष्टिः ॥ श्रन्थिग्रन्थिदम्भिस्वञ्जी- नामिति वक्तव्यम्॥ श्रेथतुः, श्रेथुः। ग्रेथतुः, ग्रेथुः। देभतुः, देभुः। परिषस्वजे, परिषस्वजाते॥

मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥ ७ ॥

मृड मृद गुध कुष क्लिश वद वस् इत्येतेभ्यः परः क्त्वा प्रत्ययः किद् भवति। 'न क्त्वा सेट्' (१.२.१८) इति कित्त्वप्रतिषेधं वक्ष्यति, तस्यायं पुरस्तादपकर्षः। गुधकुषक्लिशीनां तु 'रलो व्युपधाद्०' (१.२.२६) इति विकल्पे प्राप्ते नित्यार्थं

---

१ - 'बिभेद' इति पाठान्तरम्।

वचनम्। मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा। क्लिशित्वा। उदित्वा। उषित्वा॥

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ८ ॥

रुद विद मुष ग्रहि स्वपि प्रच्छ् इत्येतेभ्यः संश्च क्त्वा च कितौ भवतः। रुदविदमुषीणां 'रलो व्युपधाद्०' (१.२.२६) इति विकल्पे प्राप्ते नित्यार्थं ग्रहणम्। ग्रहेर्विध्यर्थमेव। स्वपिप्रच्छ्योः सन्नर्थं ग्रहणम्। किदेव हि क्त्वा। रुदित्वा, रुरुदिषति। विदित्वा, विविदिषति। मुषित्वा, मुमुषिषति। गृहीत्वा, जिघृक्षति। सुप्त्वा, सुषुप्सति। पृष्ट्वा, पिपृच्छिषति। ग्रहादीनां कित्त्वात् संप्रसारणं भवति। 'किरश्च पञ्चभ्यः' (७.२.७५) इति प्रच्छेरिडागमः॥

इको झल् ॥ ९ ॥

सन्नित्यनुवर्तते। क्त्वेति निवृत्तम्। इगन्ताद् धातोः परो झलादिः सन् किद् भवति। चिचीषति। तुष्टूषति। चिकीर्षति। इक इति किम् ? पिपासति। तिष्ठासति। झलिति किम्? शिशयिषते। किमर्थमिदमुच्यते? गुणो मा भूदिति। 'अज्झनगमां सनि' (६.४.१६) इति दीर्घत्वं गुणस्य बाधकं भविष्यति। यथैव तर्हि दीर्घत्वं गुणं बाधते तथा णिलोपमपि बाधेत। तस्माद् दीर्घत्वस्यावकाशदानाय कित्त्वमिदमारभ्यते। चिचीषतीत्यादिषु सावकाशं दीर्घत्वं परत्वाद् णिलोपेन बाध्यते। ज्ञीप्सति॥

इकः कित्त्वं गुणो मा भूद् दीर्घारम्भात्कृते भवेत्।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते॥ १॥
सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम्॥ २॥

हलन्ताच्च ॥ १० ॥

इकः सन् झल् किदिति वर्तते। समीपवचनोऽन्तशब्दः। हल् चासावन्तश्च हलन्तः। इगन्ताद् इक्समीपाद् हलः परः सन् झलादिः किद् भवति। बिभित्सति। बुभुत्सते। इक इत्येव—यियक्षते। झलित्येव—विवर्तिषते। दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम्। धीप्सति। धिप्सति॥

लिङ्सिचावात्मनेपदेषु ॥ ११ ॥

हलन्ताद् इको झल् किदिति वर्तते। सन् इति निवृत्तम्। इगन्ताद् इक्समीपाद् हलः परौ झलादी लिङ्सिचावात्मनेपदेषु परतः कितौ भवतः। भित्सीष्ट। भुत्सीष्ट। सिचि खल्वपि—अभित्त। अबुद्ध। इक इत्येव—यक्षीष्ट। अयष्ट। संप्रसारणं हि

स्यात्। आत्मनेपदेष्विति किम्? अस्राक्षीत्। अद्राक्षीत्। 'सृजिदृशोर्झल्यमकिति' (६.१.५८) इत्यमागमो न स्यात्। हलन्तादित्येव—चेषीष्ट। अचेष्ट। गुणो न स्यात्। झल् इत्येव—वर्तिषीष्ट। अवर्तिष्ट। गुणो न स्यात्। लिङ्सिचाविति किम्? द्वेष्टा। द्वेक्ष्यते ॥

उश्च ॥ १२ ॥

ऋवर्णान्ताद् धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः। कृषीष्ट। हृषीष्ट। सिचः खल्वपि—अकृत। अहृत। झल् इत्येव—वरिषीष्ट। अवरिष्ट। 'वृतो वा' (७.२.३८)—अवरीष्ट ॥

वा गमः ॥ १३ ॥

लिङ्सिचावात्मनेपदेष्विति वर्तते। गमेर्धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी वा कितौ भवतः।संगंसीष्ट, संगसीष्ट। सिचः खल्वपि—समगंस्त, समगत। कित्त्वपक्षे-ऽनुनासिकलोपो भवति—'अनुदात्तोपदेशवनतितनोत्यादीनाम्०' (६.४.३७) इति॥

हनः सिच् ॥ १४ ॥

हन्तेर्धातोः परः सिच् किद् भवति। आहत, आहसाताम्, आहसत। सिचः कित्त्वाद् अनुनासिकलोपः। सिज्ग्रहणं लिङ्निवृत्त्यर्थम्, उत्तरत्रानुवृत्तिर्मा भूत्। आत्मने-पदग्रहणमुत्तरार्थमनुवर्तते। इह तु परस्मैपदे हन्तेर्वधभावस्य नित्यत्वात् कित्त्वस्य प्रयोजनं नास्ति॥

यमो गन्धने ॥ १५ ॥

सिच् आत्मनेपदेष्विति वर्तते। यमेर्धातोर्गन्धने वर्तमानात् परः सिच् प्रत्ययः किद् भवत्यात्मनेपदेषु परतः। गन्धनं सूचनम्, परेण प्रच्छाद्यमानस्यावद्यस्याविष्करणम्। अनेकार्थत्वाद् धातूनां यमिस्तत्र वर्तते। उदायत, उदायसाताम्, उदायसत। सूचितवान् इत्यर्थः। सिचः कित्त्वादनुनासिकलोपः। 'आङो यमहनः' (१.३.२८) इत्यात्मनेपदम्। गन्धन इति किम्? उदायंस्त पादम्। उदायंस्त कूपाद् उदकम्। उद्धृतवान् इत्यर्थः। सकर्मकत्वेऽपि 'समुदाङ्भ्यो यमोऽग्रन्थे' (१.३.७५) इत्यात्मनेपदम्॥

---

१ - 'द्वेक्ष्यति' इत्येव सार्वत्रिकः पाठः। स च द्वयङ्गविकल इति न युक्तः।

२ - 'ऋकारान्ताद्' इति न्यासः। ३ - 'आत्मनेपदेष्वित्येव—अकार्षीत्' इत्यपि क्वाचित्कः पाठः।

४ - 'रज्जुम्' इति पाठान्तरम्।

विभाषोपयमने ॥ १६ ॥

यमः सिजात्मनेपदेष्विति वर्तते। यमेर्धातोरुपयमने वर्तमानात् परः सिच् प्रत्ययो विभाषा किद् भवत्यात्मनेपदेषु परतः। उपायत कन्याम्, उपायंस्त कन्याम्। उपायत भार्याम्, उपायंस्त भार्याम्। उपयमनं स्वीकरणम्, विवाहः, दारकर्म, पाणिग्रहणमित्यर्थः। 'उपाद् यमः स्वकरणे' (१.३.५६) इत्यात्मनेपदम्॥

स्थाघ्वोरिच्च ॥ १७ ॥

सिजात्मनेपदेष्विति वर्तते। तिष्ठतेर्धातोर्घुसंज्ञकानां च इकारश्चान्तादेशः सिच्च किद् भवत्यात्मनेपदेषु परतः। उपास्थित, उपास्थिषाताम्, उपास्थिषत। घुसंज्ञकानाम्—अदित। अधित॥

इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेऽपि सः।
अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः॥

न क्त्वा सेट् ॥ १८ ॥

क्त्वाप्रत्ययः सेण् न किद् भवति। देवित्वा। वर्तित्वा। सेडिति किम् ? कृत्वा। हृत्वा। क्त्वाग्रहणं किम् ? निगृहीतिः। उपस्निहितिः। निकुचितिः॥

न सेड् इति कृतेऽकित्त्वे निष्ठायामवधारणात्।
ज्ञापकान् न परोक्षायां सनि झल्ग्रहणं विदुः॥ १॥
इत्त्वं कित्संनियोगेन रेण तुल्यं सुधीवनि।
वस्वर्थं किदतीदेशान् निगृहीतिः प्रयोजनम्॥ २॥

निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ॥ १९ ॥

न सेडिति वर्तते। शीङ् स्विदि मिदि क्ष्विदि धृषू इत्येतेभ्यः परो निष्ठाप्रत्ययः सेण् न किद् भवति। शयितः, शयितवान्। प्रस्वेदितः, प्रस्वेदितवान्। प्रमेदितः, प्रमेदितवान्। प्रक्ष्वेदितः, प्रक्ष्वेदितवान्। प्रधर्षितः, प्रधर्षितवान्। सेड् इत्येव—स्विन्नः, स्विन्नवान्। स्विदादीनाम् 'आदितश्च' (७.२.१६) इति निष्ठायामिट् प्रतिषिध्यते। 'विभाषा भावादिकर्मणोः' (७.२.१७) इति पक्षेऽभ्यनुज्ञायते, स विषयः कित्त्वप्रतिषेधस्य॥

मृषस्तितिक्षायाम् ॥२०॥

मृषेर्धातोः तितिक्षायामर्थे निष्ठा सेण् न किद् भवति। तितिक्षा क्षमा। मर्षितः, मर्षितवान्। तितिक्षायामिति किम् ? अपमृषितं वाक्यमाह॥

---

१ - 'हुत्वा' इति पाठान्तरम्।

उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ॥ २१ ॥

निष्ठा सेण् न किद् इति वर्तते। उदुपधाद् धातोः परो भाव आदिकर्मणि च वर्तमानो निष्ठाप्रत्ययः सेड् अन्यतरस्यां न किद् भवति। द्युतितमनेन, द्योतितमनेन। प्रद्युतितः, प्रद्योतितः। मुदितमनेन, मोदितमनेन। प्रमुदितः, प्रमोदितः। उदुपधाद् इति किम् ? लिखितम् अनेन। भावादिकर्मणोरिति किम् ? रुचितं कार्षापणं ददाति। सेड् इत्येव—प्रभुक्त ओदनः। व्यवस्थितविभाषा चेयम्। तेन शब्विकरणानामेव भवति। 'गुध परिवेष्टने' (दिवा० १४)—गुधितम् इत्यत्र न भवति॥

पूङः क्त्वा च ॥ २२ ॥

अन्यतरस्याम् इति न स्वर्यते, उत्तरसूत्रे पुनर्वावचनात्। न सेड् इति वर्तते। पूङश्चेड् विहितः 'क्लिशः क्त्वानिष्ठयोः' (७.२.५०) 'पूङश्च' (७.२.५१) इति। पूङः परो निष्ठाप्रत्ययः क्त्वा च सेण् न किद् भवति। पवितः, पवितवान्। क्त्वाग्रत्ययस्य 'न क्त्वा सेट्' (१.२.१८) इति सिद्ध एव प्रतिषेधः। तस्य ग्रहणमुत्तरार्थम्। तथा चोक्तम्—'नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः क्त्वाग्रहणमुत्तरार्थम्' (महाभाष्य १.२०१) इति॥

नोपधात् थफान्ताद् वा ॥ २३ ॥

निष्ठेति निवृत्तम्। नकारोपधाद् धातोस्थकारान्तात् फकारान्ताच्च परः क्त्वाप्रत्ययः सेड् वा न किद् भवति। ग्रथित्वा, ग्रन्थित्वा। श्रथित्वा, श्रन्थित्वा। गुफित्वा, गुम्फित्वा। नोपधाद् इति किम्? रेफित्वा। गोफित्वा। थफान्ताद् इति किम्? स्रंसित्वा। ध्वंसित्वा॥

वञ्चिलुञ्च्यृतश्च ॥ २४ ॥

वञ्चि लुञ्चि ऋत् इत्येतेभ्यः परः क्त्वाप्रत्ययः सेड् वा न किद् भवति। वचित्वा, वञ्चित्वा। लुचित्वा, लुञ्चित्वा। ऋतित्वा, अर्तित्वा। 'ऋतेरीयङ्' (३.१.२९) आर्धधातुके विकल्पितः। स यत्र पक्षे नास्ति तत्रेदम् उदाहरणम्। सेड् इत्येव—वक्त्वा॥

तृषिमृषिकृशेः काश्यपस्य ॥ २५ ॥

'न क्त्वा सेट्' (१.२.१८) इति प्रतिषेधे प्राप्ते कित्त्वं विकल्प्यते। तृषि मृषि कृशि इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मते वा न किद् भवति। तृषित्वा, तर्षित्वा। मृषित्वा, मर्षित्वा। कृशित्वा, कर्शित्वा। काश्यपग्रहणं पूजार्थम्,

---

१ - 'निगुधितम्' इति न्यासः। २ - 'विकल्प्यते' इति न्यासः।

वेत्येव हि वर्तते॥

रलो व्युपधाद्धलादेः संश्च ॥ २६ ॥

वेति वर्तते, सेड् इति च। उश्च इश्च वी। वी उपधे यस्य स व्युपधः। उकारोपधाद् इकारोपधाच् च धातो रलन्ताद् धलादेः परः संश्च क्त्वा च सेटौ वा कितौ भवतः। द्युतित्वा, द्योतित्वा। दिद्युतिषते, दिद्योतिषते। लिखित्वा, लेखित्वा। लिलिखिषति, लिलेखिषति। रल इति किम्? देवित्वा। दिदेविषति। व्युपधाद् इति किम्? वर्तित्वा। विवर्तिषते। हलादेरिति किम्? एषित्वा। एषिषिषति। सेड् इत्येव—भुक्त्वा। बुभुक्षते॥

ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ २७ ॥

ऊ इति त्रयाणामयं मात्रिकद्विमात्रिकत्रिमात्रिकाणां प्रश्लिष्टनिर्देशः। ह्रस्वदीर्घप्लुत इति द्वन्द्वैकवद्भावे पुँल्लिङ्गनिर्देशः। उ ऊ ऊ३ इत्येवंकालोऽज् यथाक्रमं ह्रस्वदीर्घप्लुत इत्येवंसंज्ञो भवति। उकालो ह्रस्वः—दधि। मधु। ऊकालो दीर्घः—कुमारी। गौरी। ऊ३कालः प्लुतः—देवदत्त३ अत्र न्वसि। कालग्रहणं परिमाणार्थम्। दीर्घप्लुतयोर्ह्रस्वसंज्ञा मा भूत्—आलूय। प्रलूय। 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुङ् न भवति। अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम्। प्रतक्ष्य। प्ररक्ष्य। ह्रस्वाश्रयस्तुङ् मा भूत्। तित- उच्छत्रम्। 'दीर्घात्' (६.१.७५) 'पदान्ताद् वा' (६.१.७६) इति विभाषा तुङ् मा भूत्। ह्रस्वदीर्घप्लुतप्रदेशाः—'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७)। 'अकृत्सार्वधातु- कयोर्दीर्घः' (७.४.२५) । 'वाक्यस्य टेः प्लुत उदात्तः' (८.२.८२)॥

अचश्च ॥ २८ ॥

परिभाषेयं स्थानिनियमार्था। ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः। वक्ष्यति—'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७)—रै—अतिरि। नौ—अतिनु। गो—उपगु। अच इति किम्? सुवाग् ब्राह्मणकुलम्। 'अकृत्सार्वधातु- कयोर्दीर्घः' (७.४.२५)—चीयते। श्रूयते। अच इति किम्? भिद्यते। छिद्यते। 'वाक्यस्य टेः प्लुत उदात्तः' (८.२.८२)—देवदत्त३। यज्ञदत्त३। अच इति किम्? अग्निचि३त्। सोमसु३त्। तकारस्य मा भूत्। स्वसंज्ञया विधाने नियमः। अज् इति वर्तते। इह मा भूत्—द्यौः। पन्थाः। सः। द्युभ्याम्। द्युभिः। अत्र नियमो नास्ति॥

उच्चैरुदात्तः ॥ २९ ॥

अज् इति वर्तते। उदात्तादिशब्दाः स्वरे वर्णधर्मे लोकवेदयोः प्रसिद्धा एव। त इह तद्गुणेऽचि परिभाष्यन्ते। उच्चैरुपलभ्यमानो योऽच् स उदात्तसंज्ञो भवति। उच्चैरिति

च श्रुतिप्रकर्षो न गृह्यते। उच्चैर्भाषते। उच्चैः पठतीति। किं तर्हि ? स्थानकृतम् उच्चैस्त्वं संज्ञिनो विशेषणम्। ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते। तत्र यः समाने स्थान ऊर्ध्वभागनिष्पन्नोऽच् स उदात्तसंज्ञो भवति। यस्मिन्नुच्चार्यमाणे गात्राणामायामो निग्रहो भवति, रूक्षता अस्निग्धता स्वरस्य, संवृतता कण्ठविवरस्य। ये। ते। के। उदात्तप्रदेशाः—'आद्युदात्तश्च' (३.१.३) इत्येवमादयः॥

नीचैरनुदात्तः ॥ ३० ॥

अज् इति वर्तते। नीचैरुपलभ्यमानो योऽच् सोऽनुदात्तसंज्ञो भवति। समाने स्थाने नीचभागे निष्पन्नोऽज् अनुदात्तः। यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गो मार्दवं भवति, स्वरस्य मृदुता स्निग्धता, कण्ठविवरस्योरुता महत्ता। 'त्वसमसिमनेमेत्यनुच्चानि' (फिट्० ४.१०)। नमस्ते रुद्र नीलकण्ठ सहस्राक्ष। अनुदात्तप्रदेशाः—'अनुदात्तौ सुप्पितौ' (३.१.४) इत्येवमादयः॥

समाहारः स्वरितः ॥ ३१ ॥

अज् इति वर्तते। उदात्तानुदात्तसमाहारो योऽच् स स्वरितसंज्ञो भवति। सामर्थ्याच् चात्र लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्येते, नाचौ। तौ समाहियेते यस्मिन्नचि तस्य स्वरित इत्येषा संज्ञा विधीयते। शि१क्यम्। क१न्या। साम१न्यः। क्व। स्वरितप्रदेशाः—'तित् स्वरितम्' (६.१.१८५) इत्येवमादयः॥

तस्यादित उदात्तमर्धह्रस्वम् ॥ ३२ ॥

उदात्तानुदात्तसमाहारः स्वरित इत्युक्तम्। तत्र न ज्ञायते कस्मिन्नंश उदात्तः कस्मिन्ननुदात्तः, कियान् वोदात्तः, कियान् वानुदात्त इति। तदुभयमनेनाख्यायते। तस्य स्वरितस्यादावर्धह्रस्वम् उदात्तम्, परिशिष्टम् अनुदात्तम्। अर्धह्रस्वम् इति चार्धमात्रोपलक्ष्यते। ह्रस्वग्रहणमतन्त्रम्। सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेष स्वरविभागः। शि१क्यम् इत्यत्रार्धमात्रादित उदात्ता, अपरार्धमात्रानुदात्ता, एकश्रुतिर्वा। क१न्या इत्यत्रार्धमात्रादित उदात्ता, अध्यर्धमात्रानुदात्ता। माणवक३ माणवक इत्यत्रार्धमात्रादित उदात्ता, अर्धतृतीयमात्रानुदात्ता॥

एकश्रुति दूरात् संबुद्धौ ॥ ३३ ॥

त्रैस्वर्ये पदानां प्राप्ते दूरात् संबुद्धावैकश्रुत्यं विधीयते। एका श्रुतिर्यस्य तदिदमेकश्रुति। एकश्रुति वाक्यं भवति। दूरात् संबोधयति येन वाक्येन तत् संबोधनं संबुद्धिः, न

---

१ - ' उदात्तानुदात्तस्वरसमाहारः ' इति मुद्रितेषु।

'एकवचनं संबुद्धिः' (२.३.४९)। स्वराणामुदात्तादीनामविभागो भेदतिरोधानमेकश्रुतिः। आगच्छ भो माणवक देवदत्त३। दूराद् इति किम् ? आगच्छ१ भो माणवक देवद१त्त३॥

यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३४ ॥

त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते। तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्त एकश्रुतिर्विधीयते। जपन्यूङ्खसामानि वर्जयित्वा यज्ञकर्मणि मन्त्राणामैकश्रुत्यं भवति। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वतो३म् (ऋ० ८.४४.१६)। यज्ञकर्मणीति किम्? संपाठे मा भूत्। अजपेष्विति किम् ? ममाग्ने१ वर्चो विह१वेष्वस्तु (ऋ० १०.१२८.१)। जपोऽनुकरणमन्त्रः, उपांशुप्रयोगः। अन्यूङ्खेष्विति किम् ? न्यूङ्खा ओकाराः षोडश (द्र०—आश्व० श्रौ० उत्तरार्द्ध १.११)। तेषु केचिदुदात्ताः केचिदनुदात्ताः। असामस्विति किम्? ए३ विश्वं सम१त्रिणं दह (जै० सं० ४.८.६)। सामानि वाक्यविशेषस्था गीतय उच्यन्ते। तत्रैकश्रुतिर्न भवति॥

उच्चैस्तरां वा वषट्कारः ॥ ३५ ॥

यज्ञकर्मणीति वर्तते। यज्ञकर्मणि वषट्कार उच्चैस्तरां वा भवति एकश्रुतिर्वा। वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते।वौषड् इत्यस्यैवेदं स्वरविधानम्। यद्येवं वौषड्ग्रहणमेव कस्माद् न कृतम् ? वैचित्र्यार्थम्। विचित्रा हि सूत्रस्य कृतिः पाणिनेः। सोमस्याग्ने वीही३ वौ३षट्। सोमस्याग्ने वीही३ वौ३षट् (तु०—ऐ० ब्रा० ३.५, ६)॥

विभाषा छन्दसि ॥ ३६ ॥

छन्दसि विषये विभाषैकश्रुतिर्भवति, पक्षान्तरे त्रैस्वर्यमेव भवति। वेति प्रकृते विभाषाग्रहणं यज्ञकर्मणीत्यस्य निवृत्त्यर्थम्। तेनायं स्वाध्यायकालेऽपि पाक्षिक ऐकश्रुत्य- विधिर्भवति। इ१षे त्वोर्जे त्वा, इषे त्वोर्जे त्वा (मा० सं० १.१)। अग्न आ याहि वीतये, अग्न आ याहि वीतये (कौ० सं० १.१.१)। अ१ग्निमीळे पुरोहितम्, अग्निमीळे पुरोहितम् (ऋ० १.१.१)। शन्नो दे१वीरभि१ष्टये, शन्नो देवीरभिष्टये (शौ० सं० १.६.१)॥

---

१ - ' अकरणमन्त्रः ' इति पाठभेदः, स च युक्ततरः। ' अन्तःकरणमन्त्रः ' इति पद०।

२ - ' ए३ ' इति गीतिपूरणोऽनेकमात्रः, न प्लुतः। मुद्रितसंहितायां स्वरो नोपलभ्यते।

३ - ' व्यवस्थितविकल्पोऽयमिति केचित्। व्यवस्था च वेदे मन्त्रदले नित्यं त्रैस्वर्यं ब्राह्मणदले नित्यमैकश्रुत्यमिति। " इच्छासंहितयोरार्षे छन्दो वेदे च छन्दसि " इति नानार्थकोशात्। छन्दसि वर्णसंहितायामिति भट्टाचार्यचरणा इति। भाषायामप्येकश्रुतिर्विभाषा भवतीति सिद्धम्।' इत्यपि क्वाचित्कः पाठः।

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ ३७ ॥

सुब्रह्मण्या नाम निगदस्तत्र 'यज्ञकर्मण्य०' (१.२.३४) इति 'विभाषा छन्दसि' (१.२.३६) इति चैकश्रुतिः प्राप्ता प्रतिषिध्यते। सुब्रह्मण्यायामेकश्रुतिर्न भवति। यस्तु लक्षणप्राप्तः स्वरितस्तस्योदात्त आदेशो भवति। सुब्रह्मण्यो३म्, इन्द्रागच्छ, हरिव आगच्छ, मेधातिथेर्मेष, वृषणश्वस्य मेने, गौरावस्कन्दिन्नहल्यायै जार, कौशिकब्राह्मण गौतमब्रुवाण, श्वः सुत्यामागच्छ मघवन्(श० ब्रा० ३.३.४.१७—१६)। अत्र सुब्रह्मण्योमित्योकारस्तित्स्वरेण स्वरितस्तस्योदात्तो विधीयते। इन्द्र आगच्छेत्यामन्त्रितमाद्युदात्तं द्वितीयो वर्णोऽनुदात्तः। 'उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) इति स्वरितः प्रसक्तस्तस्यानेनोदात्तः क्रियते। तेन द्वावप्युदात्तौ संपन्नौ। आगच्छेत्याकार उदात्तः। ततः परोऽनुदात्तः स्वरितस्तस्यानेनोदात्तः क्रियते। तदेवमिन्द्र आगच्छेति चत्वार उदात्ताः। पश्चिम एकोऽनुदात्तः। हरिव आगच्छेत्यनयैव प्रक्रियया चत्वार उदात्ता द्वावनुदात्तौ। मेधातिथेरिति षष्ठ्यन्तं परमामन्त्रितमनुप्रविशति। 'सुबामन्त्रिते पराङ्गवत् स्वरे' (२.१.२) इति। ततः सकलस्यामन्त्रिताद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तम्, तस्य 'उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) इति स्वरितत्वे प्राप्त इदमुदात्तत्वं विधीयते। तेन द्वावप्युदात्तौ भवतः, शेषमनुदात्तम्। वृषणश्वस्य मेने इति समानं पूर्वेण। गौरावस्कन्दिन्निति तथैव द्वे आद्ये अक्षरे उदात्ते, शेषमनुदात्तम्। अहल्यायै जारेति सुबन्तस्यामन्त्रितानुप्रवेशात् तद्वदेव स्वरः। द्वावुदात्तौ, शेषमनुदात्तम्। कौशिकब्राह्मणेति समस्तमामन्त्रितमाद्युदात्तं तत्र पूर्ववद् द्वावुदात्तौ, शेषमनुदात्तम्। एवं गौतमब्रुवाणेति द्वावुदात्तौ, शेषमनुदात्तम्। श्वः सुत्यामागच्छ मघवन्निति श्वःशब्द उदात्तः सुत्यामित्यन्तोदात्तः। 'संज्ञायां समजनिषद०' (३.३.६६) इति क्यपो विधान उदात्त इति वर्तते। आगच्छेति द्वावुदात्तौ। अन्त्योऽनुदात्तः। मघवन्निति पदात् परमामन्त्रितं निहन्यते॥

देवब्रह्मणोरनुदात्तः ॥ ३८ ॥

सुब्रह्मण्यायामेव देवा ब्रह्माण इति पठ्यते, तत्र पूर्वेण स्वरितस्योदात्ते प्राप्तेऽनेनानुदात्तो विधीयते। देवब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति। देवा ब्रह्माण आगच्छत (श० ब्रा० ३.३.४.२०)। द्वयोरपि पदयोरामन्त्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः कृतस्तस्यानुदात्तो भवति॥

स्वरितात् संहितायामनुदात्तानाम् ॥ ३९ ॥

एकश्रुतिरिति वर्तते। संहितायां विषये स्वरितात् परेषामनुदात्तानामेकश्रुतिर्भवति। इमं मे गङ्गे यमुने सरस्वति शुतुद्रि (ऋ० १०.७५.५)। माणवक जटिलकाध्यापक क्व गमिष्यसि। इममित्यन्तोदात्तम्, मे इत्यनुदात्तम्, विधिकाल एव निघातविधानात्।

तत्पुनर् 'उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) इति स्वरितं संपद्यते। तस्मात् स्वरितात् परेषामनुदात्तानां गङ्गेप्रभृतीनामेकश्रुतिर्भवति। सर्व एत आमन्त्रितनिघातेनानुदात्ताः। माणवक जटिलकेति प्रथममामन्त्रितमाद्युदात्तं तस्य द्वितीयमक्षरं स्वरितम्, ततः परेषामनुदात्तानामेकश्रुतिर्भवति। संहिताग्रहणं किम् ? अवग्रहे मा भूत्—इ॑मं। मे॑। गङ्गे। यमुने। स॑र॑स्व॑ति॑ (ऋ० १०.७५.५)।

उदात्तस्वरितपरस्य सन्नतरः ॥ ४० ॥

अनुदात्तग्रहणमनुवर्तते। उदात्तः परो यस्मात् स उदात्तपरः, स्वरितः परो यस्मात् स स्वरितपरः। उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति। अनुदात्ततर इत्यर्थः। देवा मरुतः पृश्निमातरोऽपः (पै० सं० ३.३१.१)। मातर इत्यनुदात्तः। अप इत्यन्तोदात्तः, 'ऊडिदंपदाद्यप्पुम्रैद्युभ्यः' (६.१.१७१) इति। तत्रानुदात्तयोरेकादेश ओकारोऽनुदात्तः। तस्योदात्ते परभूते सन्नतर आदेशो भवति। इ॑मं मे॑ गङ्गे यमुने सरस्वति शुतुद्रि (ऋ० १०.७५.५)। इकारोऽनुदात्तः। शुतुद्रि इत्येतदामन्त्रितं पादादौ, तस्माद् न निहन्यते, 'अनुदात्तं सर्वमपादादौ' (८.१.१८) इति, तस्य प्रथममक्षरमुदात्तं तस्मिन् परभूते पूर्वस्य सरस्वतीतीकारस्य सन्नतर आदेशो भवति। माणवक जटिलकाध्यापक॑ क्व॑ गमिष्यसि। क्व इति स्वरितस्तस्मिन् परभूते क इत्यनुदात्तस्तस्य सन्नतर आदेशो भवति॥

अपृक्त एकाल्प्रत्ययः ॥ ४१ ॥

अपृक्त इतीयं संज्ञा भवति एकाल् यः प्रत्ययस्तस्य। असहायवाची एकशब्दः। 'स्पृशोऽनुदके क्विन्' (३.२.५८)—घृतस्पृक्। 'भजो ण्विः' (३.२.६२)—अर्धभाक्। पादभाक्। एकालिति किम्? दर्विः। जागृविः। प्रत्यय इति किम् ? सुराः। अपृक्त- प्रदेशाः—'वेरपृक्तस्य' (६.१.६७) इत्येवमादयः॥

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ ४२ ॥

'तत्पुरुषः' (२.१.२२) इति समासविशेषस्य संज्ञां वक्ष्यति। स तत्पुरुषः समाना- धिकरणपदः कर्मधारयसंज्ञो भवति। अधिकरणशब्दोऽभिधेयवाची। समानाधिकरणः समानाभिधेयः। प॑र॑म॑राज्यम्। उ॑त्त॑मा॑म॑राज्यम्। 'अकर्मधारये राज्यम्' (६.२.१३०) इत्युत्तरपदाद्युदात्तं न भवति। पाचकवृन्दारिका। तत्पुरुष इति किम्? पाचिकाभार्यः। समानाधिकरण इति किम्? ब्राह्म॑ण॑राज्यं॑म्। कर्मधारयप्रदेशाः—'कर्मधारयेऽनिष्ठा' (६.२.४६) इत्येवमादयः॥

---

१ - ' कर्मधारयप्रदेशाः—'पुंवत् कर्मधारयजातीयदेशीयेषु' (६.३.४२) इत्येवमादयः ' इति पाठान्तरम् ।

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥ ४३ ॥

प्रथमया विभक्त्या यद् निर्दिश्यते समासशास्त्रे तदुपसर्जनसंज्ञं भवति। समास इति समासविधायि शास्त्रं गृह्यते। वक्ष्यति—'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (२.१.२४) इति द्वितीयासमासे द्वितीयेत्येतत् प्रथमानिर्दिष्टम्, तृतीयासमासे तृतीयेति, चतुर्थीसमासे चतुर्थीति, पञ्चमीसमासे पञ्चमीति, षष्ठीसमासे षष्ठीति, सप्तमीसमासे सप्तमीति। कष्टश्रितः। शङ्कुलाखण्डः। यूपदारु। वृकभयम्। राजपुरुषः। अक्षशौण्डः। उपसर्जनप्रदेशाः—'उपसर्जनं पूर्वम्' (२.२.३०) इत्येवमादयः॥

एकविभक्ति चापूर्वनिपाते ॥ ४४ ॥

एका विभक्तिर्यस्य तदिदमेकविभक्ति। समासे विधीयमाने यद् नियतविभक्तिकं द्वितीये संबन्धिनि बहुभिर्विभक्तिभिर्युज्यमानेऽप्येकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवत्यपूर्वनिपाते, पूर्वनिपातं पूर्वनिपाताख्यमुपसर्जनकार्यं वर्जयित्वा। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (२.२.१८ वा०)। पूर्वपदे नानाविभक्तिकेऽप्युत्तरपदं तु पञ्चम्यन्तमेव भवति। निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः। निष्क्रान्तं कौशाम्ब्या निष्कौशाम्बिम्। निष्क्रान्तेन कौशाम्ब्या निष्कौशाम्बिना। निष्क्रान्ताय कौशाम्ब्या निष्कौशाम्बये। निष्क्रान्तात् कौशाम्ब्या निष्कौशाम्बेः। निष्क्रान्तस्य कौशाम्ब्या निष्कौशाम्बेः। निष्क्रान्ते कौशाम्ब्या निष्कौशाम्बौ। एवं निर्वाराणसिः। एकविभक्तीति किम्? राजकुमारी। अपूर्वनिपात इति किम्? न हि भवति कौशाम्बीनिरिति॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ ४५ ॥

अभिधेयवचनोऽर्थशब्दः। अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति धातुप्रत्ययौ वर्ज- यित्वा। डित्थः। कपित्थः। कुण्डम्। पीठम्। अर्थवदिति किम्? वनम्, धनमिति नान्तस्यावधेर्मा भूत्। नलोपो हि स्यात्। अधातुरिति किम्? हन्तेर्लङ्—अहन्। नलोपः स्यात्। अप्रत्यय इति किम्? काण्डे। कुड्ये। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७) इति ह्रस्वः स्यात्। अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञेष्यते। अध्या- गच्छति। प्रलम्बते। प्रातिपदिकप्रदेशाः—'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७) इत्येवमादयः॥

कृत्तद्धितसमासाश्च ॥ ४६ ॥

कृतस्तद्धिताः समासाश्च प्रातिपदिकसंज्ञा भवन्ति। अप्रत्यय इति पूर्वसूत्रे पर्युदासात्

---

१ - अनर्थकस्येत्यारभ्य प्रलम्बत इत्यन्तः पाठो न सार्वत्रिकः।

कृदन्तस्य तद्धितान्तस्य चानेन प्रातिपदिकसंज्ञा विधीयते। अर्थवत्समुदायानां समासग्रहणं नियमार्थम्। कृत्—कारकः। हारकः। कर्ता। हर्ता। तद्धितः—औपगवः। कापटवः। समासः—राजपुरुषः। ब्राह्मणकम्बलः। समासग्रहणस्य नियमार्थत्वाद् वाक्यस्यार्थवतः संज्ञा न भवति॥

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ४७ ॥

नपुंसकलिङ्गेऽर्थे यत् प्रातिपदिकं वर्तते, तस्य ह्रस्वो भवत्यादेशोऽलोऽन्त्यस्याचः। अतिरि कुलम्। अतिनु कुलम्। नपुंसक इति किम् ? ग्रामणीः। सेनानीः। प्रातिपदिकस्येति किम् ? काण्डे तिष्ठतः। कुड्ये तिष्ठतः। प्रातिपदिकग्रहणसामर्थ्यादिकादेशः पूर्वस्यान्तवद् न भवति॥

गोस्त्रियोरुपसर्जनस्य ॥ ४८ ॥

प्रातिपदिकस्येति वर्तते। गो इति स्वरूपग्रहणम्, स्त्रीति प्रत्ययग्रहणं स्वरितत्वात्। उपसर्जनग्रहणं तयोर्विशेषणम्, गोरुपसर्जनस्य स्त्रीप्रत्ययान्तस्योपसर्जनस्येति। ताभ्यां प्रातिपदिकस्य तदन्तविधिः। उपसर्जनगोशब्दान्तस्य उपसर्जनस्त्रीप्रत्ययान्तान्तस्य च प्रातिपदिकस्य ह्रस्वो भवति। चित्रगुः। शबलगुः। स्त्रियाः—निष्कौशाम्बिः। निर्वाराणसिः। अतिखट्वः। अतिमालः। उपसर्जनस्येति किम्? राजकुमारी। स्वरितत्वं किम्? अतितन्त्रीः। अतिलक्ष्मीः। अतिश्रीः ॥ ईयसो बहुव्रीहेः प्रतिषेधो वक्तव्यः॥ बहुश्रेयसी। विद्यमानश्रेयसी॥

लुक् तद्धितलुकि ॥ ४९ ॥

स्त्रीग्रहणमनुवर्तत उपसर्जनस्येति च। पूर्वेण ह्रस्वत्वे प्राप्ते लुग् विधीयते। तद्धितलुकि सति स्त्रीप्रत्ययस्योपसर्जनस्य लुग् भवति। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। दशेन्द्रः। पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः। आमलक्याः फलमामलकम्। बदरम्। कुवलम्। तद्धितग्रहणं किम्? गार्ग्याः कुलं गार्गीकुलम्। लुकीति किम्? गार्गीत्वम्। उपसर्जनस्येत्येव—अवन्ती। कुन्ती। कुरूः॥

इद् गोण्याः ॥ ५० ॥

पूर्वेण लुकि प्राप्त इकारो विधीयते। गोण्यास्तद्धितलुकि सतीकारादेशो भवति। पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः। दशगोणिः। इदिति योगविभागः। पञ्चभिः सूचीभिः क्रीतः पञ्चसूचिः। दशसूचिः। स च एवंविषय एव॥

लुपि युक्तवद् व्यक्तिवचने ॥ ५१ ॥

लुपीति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते। तत्र लुपि युक्तवद् व्यक्तिवचने भवतः। युक्तवदिति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते। स हि प्रत्ययार्थमात्मना युनक्ति। तस्य युक्तवतो व्यक्तिवचने लुबर्थे विधीयेते। अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धस्तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः। सप्तम्यर्थे वतिः। व्यक्तिवचने इति च लिङ्गसंख्ययोः पूर्वाचार्यनिर्देशः, तदीयमेवेदं सूत्रम्। तथा चास्य प्रत्याख्यानं भविष्यति—'तदशिष्यं संज्ञाप्रमाणत्वाद्' (१.२.५३) इति। व्यक्तिः स्त्रीपुंनपुंसकानि, वचनमेकत्व-द्वित्वबहुत्वानि। पञ्चालाः क्षत्रियाः पुँल्लिङ्गाः बहुवचनविषयाः। तेषां निवासो जनपदः, यथा तेषु क्षत्रियेषु व्यक्तिवचने, तद्वज्जनपदे भवतः। पञ्चालाः। कुरवः। मगधाः। मत्स्याः। अङ्गाः। वङ्गाः। सुह्माः। पुण्ड्राः। लुपीति किम्? लुकि मा भूत्—लवणः सूपः। लवणा यवागूः। लवणं शाकम्। व्यक्तिवचने इति किम्? शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वनं शिरीषवनम्। 'विभाषौषधिवनस्पतिभ्यः' (८.४.६) इति णत्वं न भवति ॥ हरीतक्यादिषु व्यक्तिः॥ हरीतक्याः फलानि, हरीतक्यः फलानि॥ खलतिकादिषु वचनम्॥ खलतिकस्य पर्वतस्यादूरभवानि वनानि, खलतिकं वनानि॥

विशेषणानां चाजातेः ॥ ५२ ॥

लुपीति वर्तते। लुबर्थस्य यानि विशेषणानि तेषामपि च युक्तवद् व्यक्तिवचने भवतो जातिं वर्जयित्वा। पञ्चालाः रमणीयाः बह्वन्नाः बहुक्षीरघृताः बहुमाल्यफलाः। गोदौ रमणीयौ बह्वन्नौ बहुक्षीरघृतौ बहुमाल्यफलौ। अजातेरिति किम्? पञ्चालाः जनपदः। गोदौ ग्रामः। जात्यर्थस्य चायं युक्तवद्भावप्रतिषेधः। तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति। पञ्चालाः जनपदो रमणीयो बह्वन्नः। गोदौ ग्रामो रमणीयो बह्वन्न इति॥ मनुष्यलुपि प्रतिषेधो वक्तव्यः॥ चञ्चाभिरूपः। वर्धिका दर्शनीयः॥

तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५३ ॥

तदिति प्रकृतं युक्तवद्भावलक्षणं निर्दिश्यते। तदशिष्यम्, न वक्तव्यम्। कस्मात्? संज्ञाप्रमाणत्वात्। संज्ञाशब्दा हि नानालिङ्गसंख्याः प्रमाणम्। पञ्चाला वरणा इति च। नैते योगशब्दाः। किं तर्हि? जनपदादीनां संज्ञा एताः। तत्र लिङ्गं वचनं च स्वभावसिद्धमेव न यत्नप्रतिपाद्यम्। यथा—आपो दाराः गृहाः सिकता वर्षा इति॥

लुब् योगाप्रख्यानात् ॥ ५४ ॥

लुबप्यशिष्यः। योऽयं 'जनपदे लुप्' (४.२.८१) 'वरणादिभ्यश्च' (४.२.८२) इति लुबुच्यते, अयं न वक्तव्यः। किं कारणम् ? योगाप्रख्यानात्। न हि पञ्चाला वरणा इति योगः संबन्धः प्रख्यायते। नैतदुपलभामहे वृक्षयोगाद् नगरे वरणा इति। किं तर्हि? संज्ञा एताः। तस्मादत्र 'तस्य निवासः' (४.२.६९) 'अदूरभवश्च' (४.२.७०) इति तद्धितो नैवोत्पद्यते, किं लुपो विधानेन॥

योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥ ५५ ॥

पञ्चालादयः संज्ञाशब्दाः, न योगनिमित्ता इत्युक्तम्, तच्चावश्यमेवाभ्युपगन्तव्यम्। योगप्रमाणे हि तदभावेऽदर्शनं स्यात्। यदि पञ्चालादिशब्दो योगस्य प्रमाणं योगस्य वाचकः स्यात्, ततस्तदभावेऽदर्शनमप्रयोगः स्यात्। दृश्यते च संप्रति विनैव क्षत्रियसंबन्धेन जनपदेषु पञ्चालादिशब्दः, ततोऽवसीयते नायं योगनिमित्तकः। किं तर्हि? रूढिरूपेणैव तत्र प्रवृत्त इति॥

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ ५६ ॥

अशिष्यमिति वर्तते। प्रधानं समासे किंचित् पदम्, प्रत्ययस्तव्यदादिः, ताभ्यामर्थवचनमर्थाभिधानमनेन प्रकारेण भवतीति पूर्वाचार्यैः परिभाषितम्—प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः, प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति। तत् पाणिनिराचार्यः प्रत्याचष्टे। अशिष्यमेतत्, अर्थस्यान्यप्रमाणत्वादिति। अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते। शब्दैरर्थाभिधानं स्वाभाविकं न पारिभाषिकम्, अशक्यत्वात्, लोकत एवार्थावगतेः। यैरपि व्याकरणं न श्रुतं तेऽपि राजपुरुषमानयेत्युक्ते राजविशिष्टं पुरुषमानयन्ति, न राजानं नापि पुरुषमात्रम्। औपगवमानयेत्युक्त उपगुविशिष्टमपत्यमानयन्ति, नोपगुं नाप्यपत्यमात्रं नोभौ। यश्च लोकतोऽर्थः सिद्धः किं तत्र यत्नेन॥

कालोपसर्जने च तुल्यम् ॥ ५७ ॥

अशिष्यमिति वर्तते। कालोपसर्जने चाशिष्ये। कस्मात्? अर्थस्यान्यप्रमाणत्वात्। तुल्यशब्दो हेत्वनुकर्षणार्थः। अशिष्यविशेषणं चैतत्। कालोपसर्जने च तुल्यमशिष्ये भवतः। इहान्ये वैयाकरणाः कालोपसर्जनयोः परिभाषां कुर्वन्ति—आ न्याय्यादुत्थानादा न्याय्याच्च संवेशनात्—एषोऽद्यतनः कालः। अपरे पुनराहुः—अहरुभयतोऽर्धरात्रम्—एषोऽद्यतनः काल इति। तथोपसर्जनपरिभाषां कुर्वन्ति—अप्रधानमुपसर्जनमिति। तत् पाणिनिराचार्यः प्रत्याचष्टे लोकतोऽर्थावगतेः। यैरपि व्याकरणं न श्रुतम्, तेऽप्याहुः—इदमस्माभिरद्य कर्तव्यमिदं श्वः कर्तव्यमिदं ह्यः कृतमिति। नैवं व्युत्पाद्यन्ते। तथोपसर्जनं वयमत्र गृहे ग्रामे वा। उपसर्जनमप्रधानमिति गम्यते। यश्च लोकतोऽर्थः सिद्धः किं तत्र

यत्नेन। यद्येवं पूर्वसूत्र एव कालोपसर्जनग्रहणं कस्माद् न क्रियते ? किमर्थो योगविभागः? प्रदर्शनार्थः। अन्यदप्येवंजातीयकमशिष्यमिति। तथा च पूर्वाचार्याः परिभाषन्ते—मत्वर्थे बहुव्रीहिः, पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्व इत्येवमादि, तदशिष्यमिति॥

जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ॥ ५८ ॥

अशिष्यमिति निवृत्तम्। जातिर्नामायमेकोऽर्थः, तदभिधान एकवचनमेव प्राप्तम्, अत इदमुच्यते। जातेराख्या जात्याख्या जात्याख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति। जात्यर्थो बहुवद् भवतीति यावत्। तेन तद्विशेषणानामजातिशब्दानामपि संपन्नादीनां बहुवचनमुपपद्यते। संपन्नो यवः। संपन्ना यवाः। संपन्नो व्रीहिः। संपन्ना व्रीहयः। पूर्ववया ब्राह्मणः प्रत्युत्त्थेयः। पूर्ववयसो ब्राह्मणाः प्रत्युत्त्थेयाः। जातिग्रहणं किम्? देवदत्तः। यज्ञदत्तः। आख्यायामिति किम्? काश्यपप्रतिकृतिः काश्यपः। भवत्ययं जातिशब्दो न त्वनेन जातिराख्यायते। किं तर्हि ? प्रतिकृतिः। एकस्मिन्निति किम्? व्रीहियवौ ॥ संख्याप्रयोगे प्रतिषेधो वक्तव्यः॥ एको व्रीहिः संपन्नः सुभिक्षं करोति॥

अस्मदो द्वयोश्च ॥ ५९ ॥

अस्मदो योऽर्थस्तस्यैकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवति। अहं ब्रवीमि, वयं ब्रूमः। आवां ब्रूवः, वयं ब्रूमः ॥ सविशेषणस्य प्रतिषेधो वक्तव्यः॥ अहं देवदत्तो ब्रवीमि। अहं गार्ग्यो ब्रवीमि। अहं पटुर्ब्रवीमि ॥ युष्मदि गुरावेकेषाम्॥ त्वं मे गुरुः। यूयं मे गुरवः॥

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ६० ॥

चकारो द्वयोरित्यनुकर्षणार्थः। फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्नक्षत्रयोर्बहुवचनमन्यतरस्यां भवति। कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः। कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः। नक्षत्र इति किम्? फल्गुन्यौ माणविके॥

छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६१ ॥

अन्यतरस्यामित्यनुवर्तते। द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छन्दसि विषय एकवचनम- न्यतरस्यां भवति। पुनर्वसुर्नक्षत्रमदितिर्देवता (मै० सं० २.१३.२०)। पुनर्वसू नक्षत्रे३मदितिर्दे३वता (तै० सं० ४.४.१०.१)। नक्षत्र इत्येव—पुनर्वसू माणवकौ।

छन्दसीति किम्? पुनर्वसू इति॥

विशाखयोश्च ॥ ६२ ॥

छन्दसीति वर्तते, द्विवचने प्राप्ते छन्दसि विषये विशाखयोरेकवचनमन्यतरस्यां भवति। विशाखा नक्षत्रमिन्द्राग्नी देवता (मै० सं० २.१३.२०)। विशाखे नक्षत्रमिन्द्राग्नी देवतां (तै० सं० ४.४.१०.२)॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ६३ ॥

छन्दसीति निवृत्तम्। तिष्य एकः पुनर्वसू द्वौ, तेषां द्वन्द्वो बह्वर्थः। तत्र बहुवचने प्राप्ते द्विवचनं विधीयते। तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसङ्गे नित्यं द्विवचनं भवति। उदितौ तिष्यपुनर्वसू दृश्येते। तिष्यपुनर्वस्वोरिति किम्? विशाखानुराधाः। नक्षत्र इति किम्? तिष्यश्च माणवकः पुनर्वसू माणवकौ तिष्यपुनर्वसवो माणवकाः। ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते? पर्यायाणामपि यथा स्यात्। तिष्यपुनर्वसू। पुष्यपुनर्वसू। सिद्ध्यपुनर्वसू। द्वन्द्व इति किम्? यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसवः। उन्मुग्धास्तिष्यादय एव विपर्ययेण दृश्यमाना बहुव्रीहिणोच्यन्ते। तेन नक्षत्रसमास एवायम्। बहुवचनस्येति किम्? एकवचनस्य मा भूत्, तिष्यपुनर्वसु इदमिति। 'सर्वो द्वन्द्वो विभाषैकवद् भवति' (परि० ३४) इत्यस्यैतदेव ज्ञापकम्। नित्यग्रहणं विकल्पनिवृत्त्यर्थम्॥

सरूपाणामेकशेष एकविभक्तौ ॥ ६४ ॥

समानं रूपमेषामिति सरूपाः। सरूपाणां शब्दानामेकविभक्तौ परत एकशेषो भवति। एकः शिष्यते, इतरे निवर्तन्ते। वृक्षश्च वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः। प्रत्यर्थं शब्दनिवेशाद् नैकेनानेकस्याभिधानम्, तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्तम्, तस्मादेकशेषः। सरूपाणामिति किम्? प्लक्षन्यग्रोधाः। रूपग्रहणं किम्? भिन्नेऽप्यर्थे यथा स्यात्—अक्षाः। पादाः। माषाः। एकग्रहणं किम्? द्विबह्वोः शेषो मा भूत्। शेषग्रहणं किम्? आदेशो मा भूत्। एकविभक्ताविति किम्? पयः पयो जरयति। ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि॥

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ ६५ ॥

शेष इति वर्तते। यूनेति सहयोगे तृतीया। वृद्धो यूना सहवचने शिष्यते युवा

---

१ - 'विशाखम्' इति संहितापाठः।

निवर्तते। वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य—अपत्यमन्तर्हितं वृद्धमिति। वृद्धयूनोः सहवचने वृद्धः शिष्यते तल्लक्षणश्चेदेव विशेषः। तदिति वृद्धयूनोर्निर्देशः। लक्षणशब्दो निमित्तपर्यायः। चेच्छब्दो यद्यर्थे। एवकारोऽवधारणे। विशेषो वैरूप्यम्। वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति, ततो वृद्धः शिष्यते युवा निवर्तते। समानायामाकृतौ वृद्धयुवप्रत्ययौ भिद्येते। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वात्स्यश्च वात्स्यायनश्च वात्स्यौ। वृद्ध इति किम्? गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ। यूनेति किम्? गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ। तल्लक्षण इति किम्? गार्ग्यवात्स्यायनौ। एवकारः किमर्थः? भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ। कुत्सा सौवीरत्वं च भागवित्तिकस्यापरो विशेषो विद्यते॥

स्त्री पुंवच्च ॥ ६६ ॥

शेष इति वर्तते, वृद्धो यूनेति च सर्वम्। स्त्री वृद्धा यूना सहवचने शिष्यते, तल्लक्षणश्चेदेव विशेषो भवति। पुंस इवास्याः कार्यं भवति। स्त्र्यर्थः पुमर्थवद् भवति। गार्गी च गार्ग्यायणश्च गार्ग्यौ। वात्सी च वात्स्यायनश्च वात्स्यौ। दाक्षी च दाक्षायणश्च दाक्षी॥

पुमान् स्त्रिया ॥ ६७ ॥

तल्लक्षणश्चेदेव विशेष इति वर्तते। वृद्धो यूनेति निवृत्तम्। स्त्रिया सहवचने पुमान् शिष्यते स्त्री निवर्तते, स्त्रीपुंसलक्षणश्चेदेव विशेषो भवति। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। कुक्कुटश्च कुक्कुटी च कुक्कुटौ। तल्लक्षणश्चेदेव विशेष इत्येव—कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ। एवकारः किमर्थः? इन्द्रश्चेन्द्राणी चेन्द्रेन्द्राण्यौ। 'पुंयोगादाख्यायाम्' (४.१.४८) इत्यपरो विशेषः। पुमानिति किम्? प्राक् च प्राची च प्राक्प्राच्यौ। प्रागित्यव्ययमलिङ्गम्॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ६८ ॥

यथासंख्यं भ्रातृपुत्रशब्दौ शिष्येते सहवचने स्वसृदुहितृभ्याम्। स्वस्रा सहवचने भ्रातृशब्दः शिष्यते। भ्राता च स्वसा च भ्रातरौ। दुहित्रा सहवचने पुत्रशब्दः शिष्यते। पुत्रश्च दुहिता च पुत्रौ॥

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ ६९ ॥

तल्लक्षणश्चेदेव विशेष इति वर्तते। नपुंसकानपुंसकमात्रकृते विशेषेऽनपुंसकेन सहवचने नपुंसकं शिष्यते, एकवच्चास्य कार्यं भवत्यन्यतरस्याम्। शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लम्। तानीमानि शुक्लानि। अनपुंसकेनेति

किम् ? शुक्लं च शुक्लं च शुक्लं च शुक्लानि। एकवच्चेति न भवति॥

पिता मात्रा ॥ ७० ॥

अन्यतरस्यामिति वर्तते नैकवदिति। मात्रा सहवचने पितृशब्दः शिष्यतेऽन्यतरस्याम्। माता च पिता च पितरौ, मातापितराविति वा॥

श्वशुरः श्वश्रूवा ॥ ७१ ॥

अन्यतरस्यामिति वर्तते। श्वश्रूवा सहवचने श्वशुरशब्दः शिष्यतेऽन्यतरस्याम्। श्वशुरश्च श्वश्रूश्च श्वशुरौ, श्वश्रूश्वशुराविति वा॥

त्यदादीनि सर्वैर्नित्यम् ॥ ७२ ॥

त्यदादीनि शब्दरूपाणि सर्वैः सहवचने नित्यं शिष्यन्ते, त्यदादिभिरन्यैश्च। सर्वग्रहणं साकल्यार्थम्। नित्यग्रहणं विकल्पनिवृत्त्यर्थम्। स च देवदत्तश्च तौ। यश्च देवदत्तश्च यौ ॥ त्यदादीनां मिथो यद् यत् परं तत् तच्छिष्यते॥ स च यश्च यौ। यश्च कश्च कौ॥

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ॥ ७३ ॥

ग्राम्याणां पशूनां सङ्घा ग्राम्यपशुसङ्घाः। एतेषु सह विवक्षायां स्त्री शिष्यते। 'पुमान् स्त्रिया' (१.२.६७) इति पुंसः शेषे प्राप्ते स्त्रीशेषो विधीयते। अतरुणग्रहणं सामर्थ्यात् पशुविशेषणम्। गाव इमाः। अजा इमाः। ग्राम्यग्रहणं किम्? रुरव इमे। पृषता इमे। पशुष्विति किम्? ब्राह्मणाः। क्षत्रियाः। सङ्घेष्विति किम्? एतौ गावौ चरतः। अतरुणेष्विति किम्? वत्सा इमे। बर्करा इमे ॥ अनेकशफेष्विति वक्तव्यम्॥ इह मा भूत्—अश्वा इमे॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य द्वितीयः पादः॥



॥ प्रथमाध्यायस्य तृतीयः पादः ॥

भूवादयो धातवः ॥ १ ॥

भू इत्येवमादयः शब्दाः क्रियावचना[1] धातुसंज्ञका भवन्ति। भू—भवति। एध—एधते। स्पर्ध—स्पर्धते। धातुशब्दः पूर्वाचार्यसंज्ञा। ते च क्रियावचनानां संज्ञां कृतवन्तः। तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयते।

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः॥

धातुप्रदेशाः—'धातोः' (३.१.९१) इत्येवमादयः॥

उपदेशेऽजनुनासिक इत् ॥ २ ॥

उपदिश्यतेऽनेनेत्युपदेशः शास्त्रवाक्यानि, सूत्रपाठः खिलपाठश्च। तत्र योऽच् अनुनासिकः स इत्संज्ञो भवति। एध। स्पर्द्ध। 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' (व्या० प० १२१)। उपदेश इति किम् ? अ॒ग्न आँ अ॒पः (ऋ० ५. ४८.१)। अजिति किम्? 'आतो मनिन्क्वनिब्वनिपश्च' (३.२.७४)। अनुनासिक इति किम्? सर्वस्याचो मा भूत्। इत्प्रदेशाः—'आदितश्च' (७.२.१६) इत्येवमादयः॥

हलन्त्यम् ॥ ३ ॥

उपदेश इति वर्तते। अन्ते भवमन्त्यम्। धात्वादेः समुदायस्य यदन्त्यं हल्, तदित्संज्ञं भवति। अइउण्—णकारः। ऋऌक्—ककारः। एओङ्—ङकारः। ऐऔच्—चकारः। उपदेश इत्येव—अग्निचित्। सोमसुत्। हस्य ल् हलिति द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम्। तेन प्रत्याहारपाठे हलित्यत्र लकारस्येत्संज्ञा क्रियते। तथा च सति हलन्त्यमित्यत्र प्रत्याहारे नेतरेतराश्रयदोषो भवति॥

न विभक्तौ तुस्माः ॥ ४ ॥

पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते। तवर्ग—'टाङसिङसामिनात्स्याः' (७.१.१२)—वृक्षात्। प्लक्षात्। सकार—जस्—ब्राह्मणाः। तस्, थस्—पचतः, पचथः। मकार—अपचताम्। अपचतम्। विभक्ताविति किम् ? 'अचो यत्' (३.१.९७)। 'ऊर्णाया युस्' (५.२.१२३)। 'रुधादिभ्यः श्नम्'

---

१ - ' क्रियावचना ' इति नास्ति न्यासे। २ - ' हल्हलिति ' पाठान्तरम्।

(३.१.७८)। 'किमोऽत्' (५.३.१२), 'इटोऽत्' (३.४.१०६) इत्यत्र प्रतिषेधो न भवति, अनित्यत्वादस्य प्रतिषेधस्य। 'इदमस्थमुः' (५.३.२४) इत्युकारानुबन्धनिर्देशाद-नित्यत्वमुपलक्ष्यते॥

आदिर्ञिटुडवः ॥ ५ ॥

इदिति वर्तते। आदिशब्दः प्रत्येकमभिसंबध्यते। ञि टु डु इत्येतेषां समुदायानामादितो वर्तमानानामित्संज्ञा भवति। ञिमिदा—मिन्नः। ञिधृषा—धृष्टः। ञिक्ष्विदा—क्ष्विण्णः। ञिइन्धी—इद्धः। टुवेपृ—वेपथुः। टुओश्वि—श्वयथुः। डुपचष्—पक्त्रिमम्। डुवप्—उप्त्रिमम्। डुकृञ्—कृत्रिमम्। आदिरिति किम्? पटूयति। कण्डूयति। उपदेश इत्येव—ञिकारीयति॥

षः प्रत्ययस्य ॥ ६ ॥

षकारः प्रत्ययस्यादिरित्संज्ञो भवति। 'शिल्पिनि ष्वुन्' (३.१.१४५)—नर्तकी। रजकी। प्रत्ययस्येति किम्? षोडः। षण्डः। षडिकः। आदिरित्येव—'अविमह्योष्टिषच्' (प० उ० १.४५)—अविषः। महिषः॥

चुटू ॥ ७ ॥

चवर्गटवर्गौ प्रत्ययस्यादी इत्संज्ञौ भवतः। 'गोत्रे कुञ्जादिभ्यश्चफञ्' (४.१.९८)—कौञ्जायन्यः। छस्येयादेशं वक्ष्यति। जस्—ब्राह्मणाः। झस्यान्तादेशं वक्ष्यति। 'शण्डिकादिभ्यो ञ्यः' (४.३.९२)—शाण्डिक्यः। टवर्गः—'चरेष्टः' (३.२.१६)—कुरुचरी। मद्रचरी। ठस्येकादेशं वक्ष्यति। 'सप्तम्यां जनेर्डः' (३.२.९७)—उपसरजः। मन्दुरजः। ढस्यैयादेशं वक्ष्यति। 'अन्नाण्णः' (४.४.८५)—आन्नः। पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम् । 'तेन वित्तश्चुञ्चुप्चणपौ' (५.२.२६)—केशचुञ्चुः। केशचणः। 'अवात् कुटारच्च' (५.२.३०)—'नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः' (५.२.३१)—अवटीटः। आदिरित्येव—'कर्मणि घटोऽठच्' (५.२.३५)—कर्मठः॥

लशक्वतद्धिते ॥ ८ ॥

तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना लकारशकारकवर्गा इत्संज्ञा भवन्ति। लकार—'ल्युट् च' (३.३.११५)—चयनम्। जयनम्। शकार—'कर्तरि शप्' (३.१.६८)—भवति। पचति। कवर्ग—'क्तक्तवतू निष्ठा' (१.१.२६)—भुक्तः, भुक्तवान्। 'प्रियवशे वदः खच्' (३.२.३८)—प्रियंवदः। वशंवदः। 'ग्लाजिस्थश्च ग्स्नुः'

---

१. 'ञिष्विदा—स्विन्नः' इति पाठान्तरम्।

(३.२.१३६)—ग्लास्नुः। जिष्णुः। भूष्णुः। 'भञ्जभासमिदो घुरच्' (३.२.१६१)—भङ्गुरम्। 'टाङसिङसामिनात्स्याः' (७.१.१२)—वृक्षात्। वृक्षस्य। अतद्धित इति किम् ? चूडालः। लोमशः। कर्णिका॥

तस्य लोपः ॥ ९ ॥

तस्येत्संज्ञकस्य लोपो भवति। तथा चैवोदाहृतम्। तस्यग्रहणं सर्वलोपार्थम्। अलोऽन्त्यस्य मा भूत्—'आदिर्ञिटुडवः' (१.३.५) इति॥

यथासंख्यमनुदेशः समानाम् ॥ १० ॥

संख्याशब्देनात्र क्रमो लक्ष्यते। यथासंख्यं यथाक्रममनुदेशो भवति। अनुदिश्यत इत्यनुदेशः। पश्चादुच्चार्यत इत्यर्थः। समानां समसंख्यानां समपरिपठितानाम्[1] उद्देशिनामनुदेशिनां च यथाक्रममुद्देशिभिरनुदेशिनः संबध्यन्ते। 'तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' (४.३.९४)। प्रथमात् प्रथमः, द्वितीयाद् द्वितीय इत्यादि। तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। समानामिति किम्? 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (१.४.९०)। लक्षणादयश्चत्वारोऽर्थाः, प्रत्यादयस्त्रयः। सर्वेषां सर्वत्र कर्मप्रवचनीयसंज्ञा भवति। इह कस्माद् न भवति—'वेशोयशआदेर्भगाद् यत्' (४.४.१३१), 'ख च' (४.४.१३२) इति? स्वरितेन लिङ्गेन यथासंख्यम्, यत्र नेष्यते तत्र स्वरितत्वं न प्रतिज्ञायते। 'स्वरितेनाधिकारः' (१.३.११) इति स्वरितग्रहणं पूर्वेणापि संबध्यते॥

स्वरितेनाधिकारः ॥ ११ ॥

स्वरितेनेतीत्थंभूतलक्षणे (२.३.२१) तृतीया। स्वरितो नाम स्वरदोषो वर्णधर्मः। तेन चिह्नेनाधिकारो वेदितव्यः। अधिकारो विनियोगः। स्वरितगुणयुक्तं शब्दरूपमधिकृतत्वा- दुत्तरत्रोपतिष्ठते। 'प्रतिज्ञास्वरिताः पाणिनीयाः' (व्या० प० १२२)। 'प्रत्ययः' (३.१.१)। 'धातोः' (३.१.९१)। 'ङ्याप्प्रातिपदिकात्' (४.१.१)। 'अङ्गस्य' (६.४.१)। 'भस्य' (६.४.१२९)। 'पदस्य' (८.१.१६)॥

अनुदात्तङित आत्मनेपदम् ॥ १२ ॥

अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते, तत्रायं नियमः क्रियते। अनुदात्तेतो ये धातवो ङितश्च तेभ्य एवात्मनेपदं भवति नान्येभ्यः। अनुदात्तेदूभ्यः—आस्—आस्ते। वस्—वस्ते। ङिद्भ्यः खल्वपि—षूङ्—सूते। शीङ्—शेते॥

---

१ - 'समगणनपरिपठितानाम्' इति न्यासः। २ - 'स्वरविशेषो' इति मुद्रितेषु ।

भावकर्मणोः ॥ १३ ॥

'लः कर्मणि च भावे चाकर्मकेभ्यः' (३.४.६९) इति भावकर्मणोर्विहितस्य लस्य तिबादयः सामान्येन वक्ष्यन्ते, तत्रेदमुच्यते, भावे कर्मणि चात्मनेपदं भवति। भावे—ग्लायते भवता। सुप्यते भवता। आस्यते भवता। कर्मणि—क्रियते कटः। ह्रियते भारः। कर्मकर्तरि—लूयते केदारः स्वयमेवेति परस्मैपदं न भवति। तस्य विधाने द्वितीयं कर्तृग्रहणमनुवर्तते। तेन कर्तैव यः कर्ता तत्र परस्मैपदं भवति॥

कर्तरि कर्मव्यतिहारे ॥ १४ ॥

कर्मशब्दः क्रियावाची। व्यतिहारो विनिमयः। यत्रान्यसंबन्धिनीं क्रियामन्यः करोति, इतरसंबन्धिनीं चेतरः, स कर्मव्यतिहारः। तद्विशिष्टक्रियावचनाद् धातोरात्मनेपदं भवति। व्यतिलुनते। व्यतिपुनते। कर्मव्यतिहार इति किम्? लुनन्ति। कर्तृग्रहणमुत्तरार्थं 'शेषात् कर्तरि परस्मैपदम्' (१.३.७८) इति॥

न गतिहिंसार्थेभ्यः ॥ १५ ॥

पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते। गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतिहार आत्मनेपदं न भवति। व्यतिगच्छन्ति। व्यतिसर्पन्ति। हिंसार्थेभ्यः—व्यतिहिंसन्ति। व्यतिघ्नन्ति ॥ प्रतिषेधे हसादीनामुपसंख्यानम्॥ व्यतिहसन्ति। व्यतिजल्पन्ति। व्यतिपठन्ति ॥ हरतेरप्रतिषेधः॥ संप्रहरन्ते राजानः॥

इतरेतरान्योऽन्योपपदाच्च ॥ १६ ॥

इतरेतरोऽन्योन्य इत्येवमुपपदाद् धातोः कर्मव्यतिहार आत्मनेपदं न भवति। इतरेतरस्य व्यतिलुनन्ति। अन्योऽन्यस्य व्यतिलुनन्ति ॥ परस्परोपपदाच्चेति वक्तव्यम्॥ परस्परस्य व्यतिलुनन्ति॥

नेर्विशः ॥ १७ ॥

'शेषात् कर्तरि०' (१.३.७८) इति परस्मैपदे प्राप्ते निपूर्वाद् विश आत्मनेपदं विधीयते। नेः परस्माद् विश आत्मनेपदं भवति। निविशते। निविशन्ते। नेरिति किम्? प्रविशति। 'यदागमास्तद्ग्रहणेन गृह्यन्ते' (परि० ११), तेनाटा नास्ति व्यवधानम्। न्यविशत। नेरुपसर्गस्य ग्रहणम् 'अर्थवद्ग्रहणे नानर्थकस्य' (परि० १४) इति। तस्मादिह न भवति—मधुनि विशन्ति भ्रमराः॥

परिव्यवेभ्यः क्रियः ॥ १८ ॥

'डुक्रीञ् द्रव्यविनिमये' (क्र्या० १) ञित्त्वात् कर्त्रभिप्राये क्रियाफले सिद्धमात्मनेपदम्, अकर्त्रभिप्रायार्थोऽयमारम्भः। परिव्यवेभ्य उत्तरस्मात् क्रीणातेरात्मनेपदं भवति। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। पर्यादय उपसर्गा गृह्यन्ते। तेनेह न भवति—बहुवि क्रीणाति वनम्॥

विपराभ्यां जेः ॥ १९ ॥

'शेषात् कर्तरि परस्मैपदम्' (१.३.७८) इत्यस्यापवादः। विपरापूर्वाज् जयतेर्धातो- रात्मनेपदं भवति। विजयते। पराजयते। विपराशब्दावुपसर्गौ गृह्येते, साहचर्यात्। तेनेह न भवति—बहुवि जयति वनम्। परा जयति सेनेति॥

आङो दोऽनास्यविहरणे ॥ २० ॥

अकर्त्रभिप्रायार्थोऽयमारम्भः। आङ्पूर्वाद् ददातेरनास्यविहरणे वर्तमानादात्मनेपदं भवति। विद्यामादत्ते। अनास्यविहरण इति किम् ? आस्यं व्याददाति ॥ आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः॥ विपादिकां व्याददाति। कूलं व्याददाति॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम्॥ इह मा भूत्—व्याददते पिपीलिकाः पतङ्गस्य मुखम्॥

क्रीडोऽनुसंपरिभ्यश्च ॥ २१ ॥

'क्रीङृ विहारे' (भ्वा० २४१) एतस्माद् अनु सम् परीत्येवंपूर्वाद् आङ्पूर्वाच्चात्मनेपदं भवति। अनुक्रीडते। संक्रीडते। परिक्रीडते। आङः खल्वपि—आक्रीडते। समा साहचर्याद् अन्वादिरुपसर्गो गृह्यते, तेनेह कर्मप्रवचनीयप्रयोगे न भवति—माणवकमनु क्रीडति ॥ समोऽकूजन इति वक्तव्यम्॥ संक्रीडन्ति शकटानि ॥ आगमेः क्षमायामात्मनेपदं वक्तव्यम्॥ क्षमोपेक्षा कालहरणमिति यावत्। आगमयस्व तावन्माणवकम् ॥ शिक्षेर्जिज्ञासायाम्॥ विद्यासु शिक्षते ॥ आशिषि नाथः॥ सर्पिषो नाथते। मधुनो नाथते। आशिषीति किम्? माणवकमनुनाथति ॥ हरतेर्गतिताच्छील्ये ॥ पैतृकमश्वा अनुहरन्ते। मातृकं गावोऽनुहरन्ते। गतिताच्छील्य इति किम् ? मातुरनुहरति, पितुरनुहरति॥ किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम्॥ अपस्किरते वृषभो हृष्टः। जीविकायाम्—अपस्किरते कुक्कुटो भक्षार्थी। कुलायकरणे—अपस्किरते श्वाश्रयार्थी। हर्षादिष्विति किम्? अपकिरति कुसुमम् ॥ आङि नुप्रच्छ्योरुपसंख्यानम्॥ आनुते शृगालः।

---

१ - ' गतताच्छील्ये ' इति मुद्रितेषु।

आपृच्छते गुरुम् ॥ शप उपलम्भन इति वक्तव्यम्॥ वाचा शरीरस्पर्शनमुपलम्भनम्। देवदत्ताय शपते। यज्ञदत्ताय शपते। उपलम्भन इति किम्? शपति॥

समवप्रविभ्यः स्थः ॥ २२ ॥

सम् अव प्र वि इत्येवंपूर्वात् तिष्ठतेरात्मनेपदं भवति। संतिष्ठते। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते ॥ आङः स्थः प्रतिज्ञान इति वक्तव्यम्॥ अस्तिं सकारमातिष्ठते। आगमौ गुणवृद्धी आतिष्ठते॥

प्रकाशनस्थेयाख्ययोश्च ॥ २३ ॥

स्वाभिप्रायकथनं प्रकाशनम्। स्थेयस्याख्या स्थेयाख्या। तिष्ठन्त्यस्मिन्निति स्थेयः। विवादपदनिर्णेता लोके स्थेय इति प्रसिद्धः, तस्य प्रतिपत्त्यर्थमाख्याग्रहणम्। प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति। प्रकाशने तावत्—तिष्ठते कन्या छात्रेभ्यः। तिष्ठते वृषली ग्रामपुत्रेभ्यः। प्रकाशयत्यात्मानमित्यर्थः। स्थेयाख्यायाम्—त्वयि तिष्ठते। मयि तिष्ठते। संशय्य कर्णादिषु तिष्ठते यः (कि० ३.१४) ॥

उदोऽनूर्ध्वकर्मणि ॥ २४ ॥

उत्पूर्वात् तिष्ठतेरनूर्ध्वकर्मणि वर्तमानादात्मनेपदं भवति। कर्मशब्दः क्रियावाची। अनूर्ध्वकर्मविशिष्टात्[1] क्रियावचनात् तिष्ठतेरात्मनेपदं भवति। गेह उत्तिष्ठते। कुटुम्ब उत्तिष्ठते। तदर्थं यतत इत्यर्थः ॥ उद ईहायामिति वक्तव्यम्॥ इह मा भूत्—अस्माद् ग्रामात् शतमुत्तिष्ठति। शतमुत्पद्यत इत्यर्थः। ईहाग्रहणमनूर्ध्वकर्मण एव विशेषणम्, नापवादः। अनूर्ध्वकर्मणीति किम्? आसनादुत्तिष्ठति॥

उपान्मन्त्रकरणे ॥ २५ ॥

उपपूर्वात् तिष्ठतेर्मन्त्रकरणेऽर्थे वर्तमानादात्मनेपदं भवति। ऐन्द्र्या गार्हपत्यमुपतिष्ठते। आग्नेय्याग्नीध्रमुपतिष्ठते। मन्त्रकरण इति किम्? भर्तारमुपतिष्ठति यौवनेन ॥ उपाद् देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम्॥ देवपूजायाम्—आदित्यमुपतिष्ठते। संगतिकरणे—रथिकानुपतिष्ठते। मित्रकरणे—महामात्रानुपतिष्ठते। मित्रकरणसंगतिकरणयोः को विशेषः? संगतिकरणमुपश्लेषः, तद्यथा—गङ्गा यमुनामुपतिष्ठते। मित्रकरणं तु विनाप्युपश्लेषेण मैत्रीसंबन्धः। पथि—अयं पन्थाः स्रुघ्नमुपतिष्ठते ॥ वा लिप्सायामिति वक्तव्यम्॥ भिक्षुको ब्राह्मणकुलमुपतिष्ठते, उपतिष्ठतीति वा॥

---

१ - ' अनूर्ध्वताविशिष्टक्रिया० ' इति मुद्रितेषु।

अकर्मकाच्च ॥ २६ ॥

उपादिति वर्तते। उपपूर्वात् तिष्ठतेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति। यावद्भुक्तमुपतिष्ठते। यावदोदनमुपतिष्ठते। भुक्तमिति भावे क्तप्रत्ययः। भोजनेभोजने सन्निधीयत इत्यर्थः। अकर्मकादिति किम् ? राजानमुपतिष्ठति॥

उद्विभ्यां तपः ॥ २७ ॥

अकर्मकादिति वर्तते। उद् वि इत्येवंपूर्वात् तपतेरकर्मकक्रियावचनादात्मनेपदं भवति। उत्तपते। वितपते। दीप्यत इत्यर्थः। अकर्मकादित्येव—उत्तपति सुवर्णं सुवर्णकारः। वितपति पृष्ठं सविता ॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ उत्तपते पाणिम्। उत्तपते पृष्ठम्। वितपते पाणिम्। वितपते पृष्ठम्। स्वाङ्गं चेह न पारिभाषिकं गृह्यते 'अद्रवं मूर्त्तिमत् स्वाङ्गम्' (काशिका ४.१.५४) इति। किं तर्हि? स्वमङ्गं स्वाङ्गम् । तेनेह न भवति—देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपतीति। उद्विभ्यामिति किम् ? निष्टपति ॥

आङो यमहनः ॥ २८ ॥

अकर्मकादिति वर्तते। 'यम उपरमे' (भ्वा० ७१०), 'हन हिंसागत्योः' (अदा० २) इति परस्मैपदिनौ। ताभ्यामकर्मकक्रियावचनाभ्यामाङ्पूर्वाभ्यामात्मनेपदं भवति। आयच्छते, आयच्छेते, आयच्छन्ते। हनः खल्वपि—आहते, आघ्नाते, आघ्नते। अकर्मकादित्येव—आयच्छति कूपाद् रज्जुम्। आहन्ति वृषलं पादेन ॥ स्वाङ्गकर्मकाच्चेति वक्तव्यम्॥ आयच्छते पाणिम्। आहते शिरः। स्वाङ्गं चेह न पारिभाषिकं गृह्यते। किं तर्हि? स्वमङ्गं स्वाङ्गम्, तेनेह न भवति—आहन्ति शिरः परकीयमिति॥

समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ॥ २९ ॥

अकर्मकादिति वर्तते। शेषात् कर्तरि परस्मैपदे प्राप्ते संपूर्वेभ्यो गमि ऋच्छि प्रच्छि स्वरति अर्ति श्रु विदि इत्येतेभ्योऽकर्मकेभ्यो धातुभ्य आत्मनेपदं भवति। संगच्छते। समृच्छते। संपृच्छते। संस्वरते। संकल्पा अस्य समरन्त। अर्तेर्लुङि च्लेः 'सर्तिशास्त्यर्तिभ्यश्च' (३.१.५६) इत्यङादेशः। तत्र परस्मैपदेष्वित्येतद् नाश्रीयते। 'बहुलं छन्दस्यमाङ्योगेऽपि' (६.४.७५) इत्याट् प्रतिषिध्यते। 'ऋदृशोऽङि गुणः' (७.४.१६) इति गुणः—समरन्त। संशृणुते। संवित्ते। ऋच्छेरनादेशस्य ग्रहणम्—समृच्छिष्यते। अत्यादेशस्य त्वर्तीत्येव सिद्धमात्मनेपदम्। अर्तिरुभयत्र पठ्यते, 'ऋ गतिप्रापणयोः' (भ्वा० ६७०) इति भ्वादौ, 'ऋ सृ गतौ' (जु० १६) इति जुहोत्यादौ, विशेषाभावाद् द्वयोरपि ग्रहणम्। विदेर्ज्ञानार्थस्य ग्रहणम्, परस्मैपदिभिर्गमादिभिः साहचर्यात्, न लाभार्थस्य स्वरितेत्त्वादु-

भयतोभाषस्य ॥ दृशेश्चेति वक्तव्यम्॥ संपश्यते। अकर्मकादित्येव—ग्रामं संपश्यति॥

निसमुपविभ्यो ह्रः ॥ ३० ॥

अकर्मकादिति निवृत्तम्। अतः परं सामान्येनात्मनेपदविधानं प्रतिपत्तव्यम्। नि सम् उप वि इत्येवंपूर्वाद् ह्रयतेर्धातोरात्मनेपदं भवति। निह्रयते। संह्रयते। उपह्रयते। विह्रयते। अकर्त्रभिप्रायार्थोऽयमारम्भः। अन्यत्र हि जित्त्वात् सिद्धमेवात्मनेपदम्॥ उपसर्गाद- स्यत्यूह्योर्वा वचनम्॥ निरस्यति, निरस्यते। समूहति, समूहते॥

स्पर्धायामाङः ॥ ३१ ॥

अकर्त्रभिप्रायार्थोऽयमारम्भः। स्पर्धायां विषय आङ्पूर्वाद् ह्रयतेरात्मनेपदं भवति। स्पर्धा संघर्षः, पराभिभवेच्छा, स विषयो धात्वर्थस्य। धातुस्तु शब्दक्रिय एव। मल्लो मल्लमाह्रयते। छात्रश्छात्रमाह्रयते। स्पर्धमानस्तस्याह्रानं करोतीत्यर्थः। स्पर्धायामिति किम्? गामाह्रयति गोपालः॥

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः॥ ३२॥

कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। गन्धनादिष्वर्थेषु वर्तमानात् करोतेरात्मनेपदं भवति। गन्धनमपकारप्रयुक्तं हिंसात्मकं सूचनम्। तथाहि—'बस्त गन्ध अर्दने' (चु० १५२), 'अर्द हिंसायाम्' (चु० २५५) इति चुरादौ पठ्यते। अवक्षेपणं भर्त्सनम्। सेवनमनुवृत्तिः। साहसिक्यं साहसं कर्म। प्रतियत्नः सतो गुणान्तराधानम्। प्रकथनं प्रकर्षेण कथनम्। उपयोगो धर्मादिप्रयोजनो विनियोगः। गन्धने तावत्—उत्कुरुते। उदाकुरुते। सूचयतीत्यर्थः। अवक्षेपणे—श्येनो वर्तिकामुदाकुरुते। भर्त्सयतीत्यर्थः। सेवने—गणकानुपकुरुते। महामात्रानुपकुरुते। सेवत इत्यर्थः। साहसिक्ये—परदारान् प्रकुरुते। तेषु सहसा प्रवर्तत इत्यर्थः। प्रतियत्ने—एधोदकस्योपस्कुरुते। काण्डं गुडस्योपस्कुरुते। तस्य सतो गुणान्तराधानं करोतीत्यर्थः। षष्ठीसुटौ करोतेः प्रतियत्न एव विधीयेते। प्रकथने—गाथाः प्रकुरुते। जनापवादान् प्रकुरुते। प्रकर्षेण कथयतीत्यर्थः। उपयोगे—शतं प्रकुरुते। सहस्रं प्रकुरुते। धर्मार्थं शतं विनियुङ्क्त इत्यर्थः। एतेष्विति किम्? कटं करोति॥

अधेः प्रसहने ॥ ३३ ॥

अकर्त्रभिप्रायार्थोऽयमारम्भः। अधिपूर्वात् करोतेः प्रसहने वर्तमानादात्मनेपदं भवति।

---

१ - 'साहसिकम्' इति मुद्रितेषु। २ - 'कृञः प्रतियत्न इति षष्ठी। उपात् प्रतियत्नेति सुट्' इति क्वाचित्कः पाठः।

प्रसहनमभिभवः, अपराजयो वा। तमधिचक्रे। तमभिबभूव, न तेन पराजित इति वा। प्रसहन इति किम् ? अर्थमधिकरोति। पृथग्योगकरणमुपसर्गविशेषणार्थम्॥

वेः शब्दकर्मणः ॥ ३४ ॥

कृञ इत्यनुवर्तते। विपूर्वात् करोतेरकर्त्रभिप्राये क्रियाफले शब्दकर्मण आत्मनेपदं भवति। कर्मशब्द इह कारकाभिधायी न क्रियावचनः। क्रोष्टा विकुरुते स्वरान्। ध्वाङ्क्षो विकुरुते स्वरान्। शब्दकर्मण इति किम् ? विकरोति पयः॥

अकर्मकाच्च ॥ ३५ ॥

वेः कृञ इत्यनुवर्तते। विपूर्वात् करोतेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति। विकुर्वते सैन्धवाः। साधुदान्ताः शोभनं वल्गन्तीत्यर्थः। ओदनस्य पूर्णाश्छात्रा विकुर्वते। निष्फलं चेष्टन्त इत्यर्थः। अकर्मकादिति किम् ? कटं विकरोति ॥

संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ ३६ ॥

'णीञ् प्रापणे' (भ्वा० ६४२) अस्मात् कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। णीञ् प्रापणे इत्येतस्माद् धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु सत्सु। संमाननं पूजनम्—नयते चार्वी लोकायते। चार्वी बुद्धिः तत्संबन्धादाचार्योऽपि चार्वी, स लोकायते शास्त्रे पदार्थान्नयते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति, ते युक्तिभिः स्थाप्यमानाः संमानिताः पूजिता भवन्ति। उत्सञ्जनमुत्क्षेपणम्—माणवकमुदानयते। उत्क्षिपतीत्यर्थः। आचार्यकरणमाचार्यक्रिया, माणवकमीदृशेन विधिनात्मसमीपं प्रापयति यथा स उपनेता स्वयमाचार्यः संपद्यते। माणवकमुपनयते। आत्मानमाचार्यीकुर्वन् माणवकमात्मसमीपं प्रापयतीत्यर्थः। ज्ञानं प्रमेयनिश्चयः—नयते चार्वी लोकायते। तत्र प्रमेयं निश्चिनोतीत्यर्थः। भृतिर्वेतनम्—कर्मकरानुपनयते। भृतिदानेन समीपं करोतीत्यर्थः। विगणनमृणादेर्निर्यातनम्—मद्राः करं विनयन्ते। निर्यातयन्तीत्यर्थः। व्ययो धर्मादिषु विनियोगः—शतं विनयते। सहस्रं विनयते। धर्माद्यर्थं शतं विनियुङ्क्त इत्यर्थः। एतेष्विति किम् ? अजां नयति ग्रामम्॥

कर्तृस्थे चाशरीरे कर्मणि ॥ ३७ ॥

नयतेः कर्ता देवदत्तादिर्लकारवाच्यः। कर्तृस्थे कर्मण्यशरीरे सति नयतेरात्मनेपदं भवति। शरीरं प्राणिकायः, तदेकदेशोऽपि शरीरम्। क्रोधं विनयते। मन्युं विनयते।

---

१ - ' अकर्म .....विकरोति' इति मुद्रितेषु नास्ति।

कर्तृस्थ इति किम् ? देवदत्तो यज्ञदत्तस्य क्रोधं विनयति। अशरीर इति किम्? गडुं विनयति। घाटां विनयति। कर्मणीति किम्? बुद्ध्या विनयति। प्रज्ञया विनयति॥

वृत्तिसर्गतायनेषु क्रमः ॥ ३८ ॥

शेषात् कर्तरि परस्मैपदे प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति। वृत्तिरप्रतिबन्धः। सर्ग उत्साहः। तायनं स्फीतता। वृत्तौ तावत्—ऋक्ष्वस्य क्रमते बुद्धिः। न प्रतिहन्यत इत्यर्थः। यजुःष्वस्य क्रमते बुद्धिः। सर्गे—व्याकरणाध्ययनाय क्रमते। उत्सहत इत्यर्थः। तायने—अस्मिन् शास्त्राणि क्रमन्ते। स्फीतीभवन्तीत्यर्थः॥

उपपराभ्याम् ॥ ३९ ॥

वृत्तिसर्गतायनेष्विति वर्तते। उपपरापूर्वात् क्रमतेर्वृत्त्यादिष्वर्थेषु वर्तमानादात्मनेपदं भवति। किमर्थं तर्हीदमुच्यते? उपसर्गनियमार्थम्। सोपसर्गादुपपरापूर्वादेव, नान्यपूर्वादिति। उपक्रमते। पराक्रमते। उपपराभ्यामिति किम् ? संक्रामति। वृत्त्यादिष्वित्येव—उपक्रामति। पराक्रामति॥

आङ उद्गमने ॥ ४० ॥

आङ्पूर्वात् क्रमतेरुद्गमने वर्तमानादात्मनेपदं भवति। आक्रमत आदित्यः। आक्रमते चन्द्रमाः। आक्रमन्ते ज्योतींषि। उद्गमन इति किम् ? आक्रामति माणवकः कुतपम् ॥ ज्योतिरुद्गमन इति वक्तव्यम्॥ इह मा भूत्—आक्रामति धूमो हर्म्यतलात्॥

वेः पादविहरणे ॥ ४१ ॥

विपूर्वात् क्रमतेः पादविहरणेऽर्थे वर्तमानादात्मनेपदं भवति। विहरणं विक्षेपः। सुष्ठु विक्रमते। साधु विक्रमते। अश्वादीनां गतिविशेषो विक्रमणमुच्यते। यद्यपि क्रमिः पादविहरण एव पठ्यते 'क्रमु पादविक्षेपे' (भ्वा० ३१६) इति, तथाप्यनेकार्थत्वाद् धातूनामेवमुक्तम्। पादविहरण इति किम् ? विक्रामत्यजिनसन्धिः॥

प्रोपाभ्यां समर्थाभ्याम् ॥ ४२ ॥

प्र उप इत्येताभ्यामुपसर्गाभ्यां परस्मात् क्रमतेरात्मनेपदं भवति, तौ चेत् प्रोपौ समर्थौ तुल्यार्थौ भवतः। क्व चानयोस्तुल्यार्थता ? आदिकर्मणि। प्रक्रमते भोक्तुम्। उपक्रमते भोक्तुम्। समर्थाभ्यामिति किम् ? पूर्वेद्युः प्रक्रामति। गच्छतीत्यर्थः। अपरेद्युरुपक्रामति।

---

१ - 'एतेष्विति किम्? अपक्रामति' इत्यधिकं मुद्रितेष्वपपाठः।

२ - 'कुतुपम्' इति पाठान्तरम्। ३ - 'उपसर्गाभ्याम्' इति न सार्वत्रिकः।

आगच्छतीत्यर्थः। अथ 'उपपराभ्याम्' (१.३.३६) इत्यनेनात्मनेपदमत्र कस्माद् न भवति ? वृत्त्यादिग्रहणं तत्रानुवर्तते, ततोऽन्यत्रेदं प्रत्युदाहरणम्॥

अनुपसर्गाद्वा ॥ ४३ ॥

क्रम इति वर्तते। अप्राप्तविभाषेयम्। उपसर्गवियुक्तात् क्रमतेरात्मनेपदं वा भवति। क्रमते। क्रामति। अनुपसर्गादिति किम् ? संक्रामति॥

अपह्नवे ज्ञः ॥ ४४ ॥

शेषात् कर्तरि परस्मैपदे प्राप्ते जानातेरपह्नवे वर्तमानादात्मनेपदं भवति। अपह्नवो- ऽपह्नुतिरपलापः। सोपसर्गश्चायमपह्नवे वर्तते, न केवलः। शतमपजानीते। सहस्रम- पजानीते। अपलपतीत्यर्थः। अपह्नव इति किम्? न त्वं किंचिदपि जानासि॥

अकर्मकाच्च ॥ ४५ ॥

अकर्त्रभिप्रायार्थमिदम्। कर्त्रभिप्राये हि 'अनुपसर्गाज्ज्ञः' (१.३.७६) इति वक्ष्यति। जानातेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति। सर्पिषो जानीते। मधुनो जानीते। कथं चायमकर्मकः? नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम्। किं तर्हि? ज्ञानपूर्विकायां प्रवृत्तौ करणत्वेन। तथा च 'ज्ञोऽविदर्थस्य करणे' (२.३.५१) इति षष्ठी विधीयते—सर्पिषो जानीते, मधुनो जानीते। सर्पिषा उपायेन प्रवर्तत इत्यर्थः। अकर्मकादिति किम्? स्वरेण पुत्रं जानाति॥

संप्रतिभ्यामनाध्याने ॥ ४६ ॥

ज्ञ इति वर्तते। सकर्मकार्थमिदम्। सं प्रति इत्येवंपूर्वाद् जानातेरनाध्याने वर्तमानादात्मनेपदं भवति। आध्यानमुत्कण्ठास्मरणम्। शतं संजानीते। सहस्रं संजानीते। शतं प्रतिजानीते। सहस्रं प्रतिजानीते। अनाध्यान इति किम् ? मातुः संजानाति। पितुः संजानाति। उत्कण्ठत इत्यर्थः॥

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ ४७ ॥

शेषात् कर्तरि परस्मैपदे (१.३.७८) प्राप्ते भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपदं भवति। भासनं दीप्तिः—वदते चार्वी लोकायते। भासमानो दीप्यमानः, तत्र पदार्थान् व्यक्तीकरोतीत्यर्थः। उपसंभाषोपसान्त्वनम्—कर्मकरानुपवदते। उपसान्त्वयतीत्यर्थः। ज्ञानं सम्यगवबोधः—वदते चार्वी लोकायते। जानाति वदितुमित्यर्थः। यत्न उत्साहः—क्षेत्रे वदते। गेहे वदते। तद्विषयमुत्साहमाविष्करोतीत्यर्थः। विमतिर्नानामतिः—क्षेत्रे

विवदन्ते। गेहे विवदन्ते। विमतिपतिता विचित्रं भाषन्त इत्यर्थः। उपमन्त्रणं रहस्युपच्छन्दनम्—कुलभार्यामुपवदते। परदारानुपवदते। उपच्छन्दयतीत्यर्थः। एतेष्विति किम्? यत्किंचिद् वदति॥

व्यक्तवाचां समुच्चारणे ॥ ४८ ॥

वद इति वर्तते। व्यक्तवाचां समुच्चारणं सहोच्चारणम्, तत्र वर्तमानाद् वदतेरात्मनेपदं भवति। ननु 'वद व्यक्तायां वाचि' (भ्वा० ७३५) इत्येव पठ्यते तत्र किं व्यक्तवाचामिति विशेषणेन? प्रसिद्ध्युपसंग्रहार्थमेतत्। व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः, तेषां समुच्चारणे यथा स्यात्। संप्रवदन्ते ब्राह्मणाः। संप्रवदन्ते क्षत्रियाः। व्यक्तवाचामिति किम्? संप्रवदन्ति कुक्कुटाः। समुच्चारण इति किम्? ब्राह्मणो वदति। क्षत्रियो वदति॥

अनोरकर्मकात् ॥ ४९ ॥

वद इति व्यक्तवाचामिति च वर्तते। अनुपूर्वाद् वदतेरकर्मकाद् व्यक्तवाग्विषयादात्मनेपदं भवति। अनुवदते कठः कलापस्य। अनुवदते मौद्गः पैप्पलादस्य। अनुः सादृश्ये। यथा कलापोऽधीयानो वदति तथा कठ इत्यर्थः। अकर्मकादिति किम्? पूर्वमेव यजुरुदितमनुवदति। व्यक्तवाचामित्येव—अनुवदति वीणा॥

विभाषा विप्रलापे ॥ ५० ॥

वद इति वर्तते, व्यक्तवाचां समुच्चारण इति च। विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्तमानाद् वदतेरात्मनेपदं भवति विभाषा। प्राप्तविभाषेयम्। विप्रवदन्ते सांवत्सराः, विप्रवदन्ति सांवत्सराः। विप्रवदन्ते मौहूर्ताः, विप्रवदन्ति मौहूर्ताः। युगपत् परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः। विप्रलाप इति किम्? संप्रवदन्ते ब्राह्मणाः। व्यक्तवाचामित्येव—विप्रवदन्ति शकुनयः। समुच्चारण इत्येव—क्रमेण मौहूर्ता मौहूर्तेन सह विप्रवदन्ति॥

अवाद् ग्रः ॥ ५१ ॥

'गृ निगरणे' (तुदा० ११६) इति तुदादौ पठ्यते, तस्येदं ग्रहणम्, न तु 'गृ शब्दे' (क्र्या० २६) इति क्र्यादिपठितस्य। तस्य ह्यवपूर्वस्य प्रयोग एव नास्ति। 'शेषात्०' (१.३.७८) इति परस्मैपदे प्राप्ते, अवपूर्वाद् गिरतेरात्मनेपदं भवति। अवगिरते, अवगिरेते, अवगिरन्ते। अवादिति किम्? गिरति॥

समः प्रतिज्ञाने ॥ ५२ ॥

ग्र इति वर्तते। संपूर्वाद् गिरतेः प्रतिज्ञाने वर्तमानादात्मनेपदं भवति। प्रतिज्ञानमभ्युपगमः। शतं संगिरते। नित्यं शब्दं संगिरते। प्रतिज्ञान इति किम्? संगिरति ग्रासम्॥

उदश्चरः सकर्मकात् ॥ ५३ ॥

शेषात् कर्तरि परस्मैपदे प्राप्ते, उत्पूर्वाच् चरतेः सकर्मकक्रियावचनादात्मनेपदं भवति। गेहमुच्चरते। कुटुम्बमुच्चरते। गुरुवचनमुच्चरते। उत्क्रम्य गच्छतीत्यर्थः। सकर्मकादिति किम्? बाष्पमुच्चरति॥

समस्तृतीयायुक्तात् ॥ ५४ ॥

संपूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं भवति। तृतीयेति तृतीया विभक्तिर्गृह्यते, तया चरतेरर्थद्वारको योगः। अश्वेन संचरते। तृतीयायुक्तादिति किम्? उभौ लोकौ संचरसि इमं चामुं च देवल। यद्यप्यत्र तदर्थयोगः संभवति, तृतीया तु न श्रूयत इति प्रत्युदाहरणं भवति॥

दाणश्च सा चेच्चतुर्थ्यर्थे ॥ ५५ ॥

'दाण् दाने' (भ्वा० ६६४) परस्मैपदी। ततः संपूर्वात् तृतीयायुक्तादात्मनेपदं भवति, सा चेत् तृतीया चतुर्थ्यर्थे भवति। कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात्? वक्तव्यमेवैतत् ॥ अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम्॥ दास्या संप्रयच्छते। वृषल्या संप्रयच्छते। कामुकः सन् दास्यै ददातीत्यर्थः। चतुर्थ्यर्थ इति किम्? पाणिना संप्रयच्छति। समः प्रशब्देन व्यवधाने कथमात्मनेपदं भवति? सम इति विशेषणे षष्ठी, न पञ्चमी॥

उपाद् यमः स्वकरणे ॥ ५६ ॥

शेषात् कर्तरि परस्मैपदे प्राप्ते, उपपूर्वाद् यमः स्वकरणे वर्तमानादात्मनेपदं भवति। पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते, न स्वकरणमात्रम्। भार्यामुपयच्छते। स्वकरण इति किम्? देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति॥

ज्ञाश्रुस्मृदृशां सनः ॥ ५७ ॥

---

१ - 'मालाम्' इत्यधिकं न्यासे । २ - न्यासपदमञ्जर्योर्नास्तीदमुदाहरणम्।

ज्ञा श्रु स्मृ दृश् इत्येतेषां सन्नन्तानामात्मनेपदं भवति। तत्र जानातेः 'अपह्नवे ज्ञः' (१.३.४४) इति त्रिभिः सूत्रैरात्मनेपदं विहितम्, श्रुदृशोरपि 'समो गम्यृच्छि०' (१.३.२९) इत्यत्र विहितम्। तस्मिन् विषये 'पूर्ववत् सनः' (१.३.६२) इत्येव सिद्धमात्मनेपदम्, ततोऽन्यत्रानेन विधीयते। स्मरतेः पुनरप्राप्त एव विधानम्। धर्मं जिज्ञासते। गुरुं शुश्रूषते। नष्टं सुस्मूर्षते। नृपं दिदृक्षते। सन इति किम्? जानाति। शृणोति। स्मरति। पश्यति॥

नानोर्ज्ञः ॥ ५८ ॥

पूर्वेण योगेन प्राप्तमात्मनेपदं प्रतिषिध्यते। अनुपूर्वाज् जानातेः सन्नन्तादात्मनेपदं न भवति। तथा च सति सकर्मकस्यैवायं प्रतिषेधः संपद्यते। पुत्रमनुजिज्ञासति। अनोरिति किम्? धर्मं जिज्ञासते॥

प्रत्याङ्भ्यां श्रुवः ॥ ५९ ॥

प्रति आङ् इत्येवंपूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति। प्रतिशुश्रूषति। आशुश्रूषति। उपसर्गग्रहणं चेदम्, तस्मादिह प्रतिषेधो न भवति—देवदत्तं प्रति शुश्रूषते॥

शदेः शितः ॥ ६० ॥

'शदॢ शातने' (भ्वा० ५९४) परस्मैपदी, तस्मादात्मनेपदं विधीयते। शदिर्यः शित्, शिद्भावी शितो वा संबन्धी, तस्मादात्मनेपदं भवति। शीयते, शीयेते, शीयन्ते। शित इति किम्? अशत्स्यत्। शत्स्यति। शिशत्सति॥

म्रियतेर्लुङ्लिङोश्च ॥ ६१ ॥

'मृङ् प्राणत्यागे' (तुदा० ११३)। ङित्त्वादात्मनेपदमत्र सिद्धमेवेति नियमार्थमिदं वचनम्। म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवति, अन्यत्र न भवति। अमृत। मृषीष्ट। शितः खल्वपि—म्रियते, म्रियेते, म्रियन्ते। नियमः किमर्थः? मरिष्यति। अमरिष्यत्॥

पूर्ववत् सनः ॥ ६२ ॥

सनः पूर्वो यो धातुरात्मनेपदी, तद्वत् सन्नन्तादात्मनेपदं भवति। येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते, तेनैव सन्नन्तादपि भवति। 'अनुदात्तङित आत्मनेपदम्' (१.३.१२)—आस्ते। शेते। सन्नन्तादपि तदेव निमित्तम्। आसिसिषते। शिशयिषते।

---

१ - 'इति' इति नास्ति है० ।

'नेर्विशः' (१.३.१७)—निविशते। निविविक्षते। 'आङ उद्गमने' (१.३.४०)—आक्रमते। आचिक्रंसते। इह न भवति—शिशत्सति। मुमूर्षति। न हि शदिम्रियतिमात्रमात्मनेपदनिमित्तम्। किं तर्हि? शिदाद्यपि, तच्चेह नास्ति। यस्य च पूर्वत्रैव निमित्तभावः प्रतिषिध्यते, तत् सन्नन्तेष्वप्यनिमित्तम्। अनुचिकीर्षति। पराचिकीर्षति। इह जुगुप्सते मीमांसत इति अनुदात्तेत इत्येव सिद्धमात्मनेपदम्—'अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति' (महाभाष्य १.२८६) इति॥

आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य ॥ ६३ ॥

अकर्त्रभिप्रायार्थोऽयमारम्भः। आम् प्रत्ययो यस्मात् सोऽयमाम्प्रत्ययः। आम्प्रत्ययस्येव धातोः कृञोऽनुप्रयोगस्यात्मनेपदं भवति। ईक्षांचक्रे। ईहांचक्रे। यदि विध्यर्थमेतत्, तर्हि उदुब्जांचकार उदुम्भांचकारेति कर्त्रभिप्राये क्रियाफल आत्मनेपदं प्राप्नोति। नैष दोषः। उभयमनेन क्रियते। विधिर्नियमश्च। कथम्? पूर्ववदिति वर्तते। स द्वितीयो यत्नो नियमार्थो भविष्यति। कृञ इति किम्? ईक्षामास। ईक्षांबभूव। कथं पुनरस्यानुप्रयोगो यावता 'कृञ्चानुप्रयुज्यते लिटि' (३.१.४०) इत्युच्यते? कृञिति प्रत्याहारग्रहणं तत्र विज्ञायते। क्व संनिविष्टानां प्रत्याहारः? 'अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः' (५.४.५०) इति कृशब्दादारभ्य यावत् 'कृञो द्वितीयतृतीय०' (५.४.५८) इति ञकारम्॥

प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ ६४ ॥

'युजिर् योगे' (रुधा० ७) स्वरितेत्। तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मने- पदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। प्र उप इत्येवंपूर्वाद् युजेरयज्ञपात्रप्रयोगविषयादात्मनेपदं भवति। प्रयुङ्क्ते। उपयुङ्क्ते। अयज्ञपात्रेष्विति किम्? द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति (आप० गृ० १.१.१६) ॥ स्वराद्यन्तोपसृष्टादिति वक्तव्यम्॥ उद्युङ्क्ते। नियुङ्क्ते। स्वराद्यन्तोपसृष्टादिति किम् ? संयुनक्ति॥

समः क्ष्णुवः ॥ ६५ ॥

'क्ष्णु तेजने' (अदा० ३०) परस्मैपदी। ततः संपूर्वादात्मनेपदं भवति। 'समो गम्यृच्छि०' (१.३.२९) इत्यत्रैव कस्मान्न पठितः? अकर्मकादिति तत्र वर्तते। संक्ष्णुते शस्त्रम्, संक्ष्णुवाते, संक्ष्णुवते॥

भुजोऽनवने ॥ ६६ ॥

---

१ - ' अनुदात्तङित ' इति है० ।

'भुज पालनाभ्यवहारयोः' (रुधा० १७) इति रुधादौ पठ्यते। तस्मादनवनेऽपालने वर्तमानादात्मनेपदं भवति। भुङ्क्ते, भुञ्जाते, भुञ्जते। अनवन इति किम्? भुनक्त्येनमग्निराहितः। अवनप्रतिषेधेन[1] रौधादिकस्यैव ग्रहणं विज्ञायते, न तौदादिकस्य 'भुजो कौटिल्ये' (तुदा० १२७) इत्यस्य। तेनेह न भवति—विभुजति पाणिम्॥

णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने ॥ ६७ ॥

'णिचश्च' (१.३.७४) इति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। ण्यन्तादात्मनेपदं भवति। कथम्? अणौ यत् कर्म णौ चेत् तदेव कर्म, स एव कर्ता भवति, अनाध्यान आध्यानं वर्जयित्वा। आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयते हस्ती स्वयमेव। उपसिञ्चन्ति हस्तिनं हस्तिपकाः। उपसेचयते हस्ती स्वयमेव। पश्यन्ति भृत्या राजानम्। दर्शयते राजा स्वयमेव। णेरिति किम्? आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयमाणो हस्ती साध्वारोहति। अणाविति किम्? गणयति गणं गोपालकः। गणयति गणः स्वयमेव। कर्मग्रहणं किम्? लुनाति दात्रेण। लावयति दात्रं स्वयमेव। णौ चेद् ग्रहणं समानक्रियार्थम्। आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयमाणो हस्ती भीतान् सेचयति मूत्रेण। यत्सग्रहणमनन्यकर्मार्थम्। आरोहन्ति हस्तिनं हस्तिपकाः। आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान्। कर्तेति किम्? आरोहन्ति हस्तिनं हस्तिपकाः। तानारोहयति महामात्रः। अनाध्यान इति किम्? स्मरति वनगुल्मस्य कोकिलः। स्मरयत्येनं वनगुल्मः स्वयमेव। ननु चात्र कर्मकर्तरि मूलोदाहरणानि, तत्र कर्मवद्भावेनैव सिद्धमात्मनेपदम्, किमर्थमिदमुच्यते? कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवदतिदेशो विज्ञायते। कर्तृस्थार्थोऽयमारम्भः। तथा च रुहिः कर्तृस्थक्रियः, दृशिः कर्तृस्थभावक उदाहृतः॥

भीस्म्योर्हेतुभये ॥ ६८ ॥

णेरिति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये। हेतुः प्रयोजकः कर्ता लकारवाच्यः, ततश्चेद् भयं भवति। भयग्रहणमुपलक्षणार्थम्। विस्मयोऽपि तत एव। जटिलो भीषयते। मुण्डो भीषयते। जटिलो विस्मापयते। मुण्डो विस्मापयते। हेतुभय इति किम्? कुञ्चिकयैनं भाययति। रूपेण विस्माययति। अत्र कुञ्चिका भयस्य करणम्, न हेतुः॥

---

१ - यथान्यासं पाठः। ' अनवनप्रतिषेधेन ' इति बाल०, ' अनवन इति प्रतिषेधेन ' इति है०।

२ - ' उप ' इति नास्ति न्यासपद० ।

गृधिवञ्च्योः प्रलम्भने ॥ ६९ ॥

णेरिति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। 'गृधु अभिकाङ्क्षायाम्' (दिवा० १३२), 'वञ्चु गतौ' (भ्वा० ११६) इत्येतयोर्ण्यन्तयोः प्रलम्भने वर्तमानयोरात्मनेपदं भवति। प्रलम्भनं विसंवादनं मिथ्याफलाख्यानम्। माणवकं गर्धयते। माणवकं वञ्चयते। प्रलम्भन इति किम्? श्वानं गर्धयति। गर्धनमस्योत्पादयतीत्यर्थः। अहिं वञ्चयति। परिहरतीत्यर्थः॥

लियः संमाननशालीनीकरणयोश्च ॥ ७० ॥

णेरिति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। 'लीङ् श्लेषणे' (दिवा० २६) इति दिवादौ पठ्यते, 'ली श्लेषणे' (क्र्या० ३३) इति च क्र्यादौ। विशेषाभावाद् द्वयोरपि ग्रहणम्। लियो ण्यन्तात् संमानने शालीनीकरणे च वर्तमानादात्मनेपदं भवति, चशब्दात् प्रलम्भने च। संमाननं पूजनम्। शालीनीकरणं न्यग्भावनम्। जटाभिरालापयते। पूजां समधिगच्छतीत्यर्थः। श्येनो वर्तिकामुल्लापयते। न्यक्करोतीत्यर्थः। प्रलम्भने—कस्त्वामुल्लापयते। विसंवादयतीत्यर्थः। 'विभाषा लीयतेः' (६.१.५१) इति वात्वं विधीयते। तदस्मिन् विषये नित्यमन्यत्र विकल्पः। व्यवस्थितविभाषा हि सा। संमाननादिष्विति किम्? बालकमुल्लापयति॥

मिथ्योपपदात् कृञोऽभ्यासे ॥ ७१ ॥

णेरिति वर्तते। अकर्त्रभिप्रायार्थोऽयमारम्भः। ण्यन्तात् करोतेर्मिथ्योपपदादात्मनेपदं भवत्यभ्यासे। अभ्यासः पुनः पुनः करणम्, आवृत्तिः। पदं मिथ्या कारयते। सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदादिति किम्? पदं सुष्ठु कारयति। कृञ इति किम्? पदं मिथ्या वाचयति। अभ्यास इति किम्? पदं मिथ्या कारयति। सकृदुच्चारयति॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ ७२ ॥

णेरिति निवृत्तम्। शेषात् कर्तरि परस्मैपदे प्राप्ते, स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति, कर्तारं चेत् क्रियाफलमभिप्रैति। क्रियायाः फलं क्रियाफलं प्रधानभूतम्, यदर्थमसौ क्रियारभ्यते तच्चेत् कर्तुर्लकारवाच्यस्य भवति। यजते। पचते। ञितः खल्वपि—सुनुते। कुरुते। स्वर्गादि प्रधानफलमिह कर्तारमभिप्रैति। कर्त्रभिप्राय इति किम्? यजन्ति याजकाः। पचन्ति पाचकाः। कुर्वन्ति कर्मकराः। यद्यपि दक्षिणा भृतिश्च कर्तुः फलमिहास्ति, तथापि न तदर्थः क्रियारम्भः॥

अपाद्वदः ॥ ७३ ॥

कर्त्रभिप्राय इति वर्तते। अपपूर्वाद् वदतेः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवति। धनकामो न्यायमपवदते। न्यायापवादेन धनमर्जयिष्यामीति मन्यते। कर्त्रभिप्राये क्रियाफल इत्येव—अपवदति॥

णिचश्च ॥ ७४ ॥

कर्त्रभिप्राये क्रियाफल इति वर्तते। णिजन्तादात्मनेपदं भवति कर्त्रभिप्राये क्रियाफले। कटं कारयते। ओदनं पाचयते। कर्त्रभिप्राय इत्येव—कटं कारयति परस्य॥

समुदाङ्भ्यो यमोऽग्रन्थे ॥ ७५ ॥

कर्त्रभिप्राय इति वर्तते। सम् उद् आङ् इत्येवंपूर्वाद् यमेः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवति, ग्रन्थविषयश्चेत् प्रयोगो न भवति। व्रीहीन् संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते। आङ्पूर्वादकर्मकाद् 'आङो यमहनः' (१.३.२८) इति सिद्धमेवात्मनेपदम्, सकर्मकार्थमिदं पुनर्ग्रहणम्। अग्रन्थ इति किम्? उद्यच्छति चिकित्सां वैद्यः। कर्त्रभिप्राय इत्येव—संयच्छति। उद्यच्छति। आयच्छति॥

अनुपसर्गाज्ज्ञः ॥ ७६ ॥

कर्त्रभिप्राय इति वर्तते। अनुपसर्गाज् जानातेः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवति। गां जानीते। अश्वं जानीते। अनुपसर्गादिति किम्? स्वर्गं लोकं न प्रजानाति मूढः। कर्त्रभिप्राय इत्येव—देवदत्तस्य गां जानाति॥

विभाषोपपदेन प्रतीयमाने ॥ ७७ ॥

'स्वरितञितः०' (१.३.७२) इति पञ्चभिः सूत्रैरात्मनेपदं कर्त्रभिप्राये क्रियाफले द्योतिते विहितम्, तदुपपदेन द्योतिते न प्राप्नोतीति वचनमारभ्यते। समीपे श्रूयमाणं शब्दान्तरमुपपदम्, तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषात्मनेपदं भवति। स्वं यज्ञं यजति, स्वं यज्ञं यजते। स्वं कटं करोति, स्वं कटं कुरुते। स्वं पुत्रमपवदति, स्वं पुत्रमपवदते। एवं पञ्चसूत्र्यामुदाहार्यम्॥

शेषात् कर्तरि परस्मैपदम् ॥ ७८ ॥

पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः, न परस्मैपदनियमः। तत् सर्वतः प्राप्नोति, तदर्थमिदमुच्यते। येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदमुक्तं ततो यदन्यत् स शेषः। शेषात् कर्तरि परस्मैपदं भवति, शेषादेव नान्यस्मात्। अनुदात्तङित आत्मनेपदमुक्तम्—आस्ते। शेते। ततोऽन्यत्र परस्मैपदं भवति—याति। वाति। नेर्विश आत्मनेपदमुक्तम्—

निविशते। ततोऽन्यत्र परस्मैपदम्—आविशति। प्रविशति। कर्तरीति किम्? पच्यते। गम्यते। कर्मकर्तरि कस्मात् परस्मैपदं न भवति—पच्यत ओदनः स्वयमेव? कर्तरि कर्मव्यतिहार इति द्वितीयं कर्तृग्रहणमनुवर्तते। तेन कर्तैव यः कर्ता, तत्र परस्मैपदम्, कर्मकर्तरि न भवति॥

अनुपराभ्यां कृञः ॥ ७९ ॥

कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितम्, तदपवादः परस्मैपदं विधीयते। अनु परा इत्येवंपूर्वात् करोतेः परस्मैपदं भवति। अनुकरोति। पराकरोति॥

अभिप्रत्यतिभ्यः क्षिपः ॥ ८० ॥

'क्षिप प्रेरणे' (तुदा० ५) स्वरितेत्। ततः कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। अभि प्रति अति इत्येवंपूर्वात् क्षिपः परस्मैपदं भवति। अभिक्षिपति। प्रतिक्षिपति। अतिक्षिपति। अभिप्रत्यतिभ्य इति किम्? आक्षिपते। द्वितीयमपि कर्तृग्रहणमनुवर्तते। तेनेह न भवति—अभिक्षिप्यते स्वयमेव॥

प्राद्वहः ॥ ८१ ॥

'वह प्रापणे' (भ्वा० ७३०) स्वरितेत्। तत्र कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। प्रपूर्वाद् वहतेः परस्मैपदं भवति। प्रवहति, प्रवहतः, प्रवहन्ति। प्रादिति किम्? आवहते॥

परेर्मृषः ॥ ८२ ॥

'मृष तितिक्षायाम्' (दिवा० ५३) स्वरितेत्। ततस्तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते। परिपूर्वाद् मृष्यतेः परस्मैपदं भवति। परिमृष्यति, परिमृष्यतः, परिमृष्यन्ति। परेरिति किम्? आमृष्यते। वहतिमपि केचिदत्रानुवर्तयन्ति—परिवहति॥

व्याङ्परिभ्यो रमः ॥ ८३ ॥

'रमु क्रीडायाम्' (भ्वा० ५६२)। अनुदात्तेत्त्वादात्मनेपदे प्राप्ते परस्मैपदं विधीयते। वि आङ् परि इत्येवंपूर्वाद् रमतेः परस्मैपदं भवति। विरमति। आरमति। परिरमति। एतेभ्य इति किम्? अभिरमते॥

उपाच्च ॥ ८४ ॥

रम इत्येव। उपपूर्वाद् रमतेः परस्मैपदं भवति। देवदत्तमुपरमति। यज्ञदत्तमुपरमति। उपरमयतीति यावत्। अन्तर्भावितण्यर्थोऽत्र रमिः। पृथग्योगकरणमुत्तरार्थम्। अकर्मकाद् विभाषां वक्ष्यति सा उपपूर्वादेव यथा स्यात्॥

विभाषाकर्मकात् ॥ ८५ ॥

रम उपादिति च वर्तते। पूर्वेण नित्ये परस्मैपदे प्राप्ते विकल्प आरभ्यते। उपपूर्वाद् रमतेरकर्मकाद् विभाषा परस्मैपदं भवति। यावद्भुक्तमुपरमति, यावद्भुक्तमुपरमते। निवर्तत इत्यर्थः॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ ८६ ॥

'णिचश्च' (१.३.७४) इति कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। बुध युध नश जन इङ् प्रु द्रु स्रु इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। बोधयति। योधयति। नाशयति। जनयति। अध्यापयति। प्रावयति। द्रावयति। स्रावयति। येऽत्राकर्मकास्तेषाम् 'अणावकर्मकाच्चित्तवत्कर्तृकात्' (१.३.८८) इत्येवं सिद्धे वचनमिदमचित्तवत्कर्तृकार्थम्। बोधयति पद्मम्। योधयन्ति काष्ठानि। नाशयति दुःखम्। जनयति सुखम्। येऽत्र चलनार्था अपि तेषां 'निगरणचलनार्थेभ्यश्च' (१.३.८७) इति सिद्धे यदा न चलनार्थास्तदर्थं वचनम्। प्रवते। प्राप्नोतीति गम्यते। अयो द्रवति। विलीयत इत्यर्थः। कुण्डिका स्रवति। स्यन्दत इत्यर्थः। एतद्विषयाण्युदाहरणानि॥

निगरणचलनार्थेभ्यश्च ॥ ८७ ॥

णेरिति वर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते। निगरणमभ्यवहारः। चलनं कम्पनम्। निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। निगारयति। आशयति। भोजयति। चलनार्थेभ्यः—चलयति। चोपयति। कम्पयति। अयमपि योगः सकर्मकार्थः, अचित्तवत्कर्तृकार्थश्च ॥ अदेः प्रतिषेधो वक्तव्यः॥ अत्ति देवदत्तः। आदयते देवदत्तेन॥

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ ८८ ॥

णेरिति वर्तते। कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते। अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च, तस्माद् ण्यन्तात् परस्मैपदं भवति। आस्ते देवदत्तः। आसयति देवदत्तम्। शेते देवदत्तः। शाययति देवदत्तम्। अणाविति किम्? चेतयमानं प्रयोजयति चेतयत इति केचित् प्रत्युदाहरन्ति, तदयुक्तम्। हेतुमण्णिचो

विधिः, प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्यः। तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यम्। इदं तु प्रत्युदाहरणम्—आरोहयमाणं प्रयुङ्क्ते, आरोहयते। अकर्मकादिति किम्? कटं कुर्वाणं प्रयुङ्क्ते, कारयते। चित्तवत्कर्तृकादिति किम्? शुष्यन्ति व्रीहयः। शोषयते व्रीहीनातपः॥

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ ८६ ॥

पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विहितम्, तस्य प्रतिषेधोऽयमुच्यते। यत् कर्त्रभिप्रायविषयमात्मनेपदम्, तदवस्थितमेव, न प्रतिषिध्यते। पा दमि आङ्यम आङ्यस परिमुह रुचि नृति वद वस इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न भवति। 'णिचश्च' (१.३.७४) इत्यात्मनेपदं भवति। तत्र पिबतिर्निगरणार्थः। दमिप्रभृतय- श्चित्तवत्कर्तृकाः। नृतिश्चलनार्थोऽपि। एषां परस्मैपदं न भवति। पा—पाययते। दमि—दमयते। आङ्यम—आयामयते। 'यमोऽपरिवेषणे' (भ्वा० ५६५) इति मित्संज्ञा प्रतिषिध्यते। आङ्यस—आयासयते। परिमुह—परिमोहयते। रुचि—रोचयते। नृति—नर्तयते। वद—वादयते। वस—वासयते॥ पादिषु धेट उपसंख्यानम्॥ धापर्येते[1] शिशुमेकं समीची (ऋ० १.६६.५)॥

वा क्यषः ॥ ६० ॥

'लोहितादिडाज्भ्यः क्यष्' (३.१.१३) इति वक्ष्यति। तदन्ताद् धातोर्वा परस्मैपदं भवति। लोहितायति, लोहितायते। पटपटायति, पटपटायते। अथात्र परस्मैपदेन मुक्ते कथमात्मनेपदं लभ्यते, यावता 'अनुदात्तङित०' (१.३.१२) इत्येवमादिना प्रकरणेन तन्नियतम्? एवं तर्हि आत्मनेपदमेवात्र विकल्पितं विधीयते, तच्चानन्तरं परस्मैपद- प्रतिषेधेन सन्निधापितमिह संबध्यते। तेन मुक्ते 'शेषात् कर्तरि परस्मैपदम्' (१.३.७८) भवति॥

द्युद्भ्यो लुङि ॥ ६१ ॥

वेत्येव। 'द्युत दीप्तौ' (भ्वा० ४६३) तत्साहचर्याद् लुठादयोऽपि कृपूपर्यन्तास्तथैव व्यपदिश्यन्ते। बहुवचननिर्देशादाद्यर्थो भवति। अनुदात्तेत्त्वान्नित्यमेवात्मनेपदे प्राप्ते, द्युतादिभ्यो लुङि वा परस्मैपदं भवति। व्यद्युतत्, व्यद्योतिष्ट। अलुठत्, अलोठिष्ट। लुङीति किम्? द्योतते॥

वृद्भ्यः स्यसनोः ॥ ६२ ॥

---

१ - ' शेषादिति नित्ये प्राप्ते विकल्पार्थं वचनम् ' इत्यधिकं क्वचित्।

द्युतादिष्वेव वृतादयः पठ्यन्ते। 'वृतु वर्तने' (भ्वा० ५०८), 'वृधु वृद्धौ' (भ्वा० ५०९), 'शृधु शब्दकुत्सायाम्' (भ्वा० ५१०), 'स्यन्दू प्रस्रवणे' (भ्वा० ५११), 'कृपू सामर्थ्ये' (भ्वा० ५१२) एतेभ्यो धातुभ्यः स्ये सनि च परतो वा परस्मैपदं भवति। वृत्—वर्त्स्यति, अवर्त्स्यत्, विवृत्सति, वर्तिष्यते, अवर्तिष्यत, विवर्तिषते। वृध्—वर्त्स्यति, अवर्त्स्यत्, विवृत्सति, वर्धिष्यते, अवर्धिष्यत, विवर्धिषते। स्यसनोरिति किम्? वर्तते॥

लुटि च क्लृपः ॥ ६३ ॥

वृतादित्वादेव स्यसनोर्विकल्पः सिद्धः, लुटि विधीयते। चकारस्तर्हि स्यसनोरनु- कर्षणार्थो न वक्तव्यः। एवं तर्हीयं प्राप्तिः पूर्वां प्राप्तिं बाधेत। तस्माच्चकारः स्यसनोर- नुकर्षणार्थः क्रियते। लुटि च स्यसनोश्च कृपेः परस्मैपदं वा भवति। कल्प्ता, कल्प्तारौ, कल्प्तारः। कल्प्स्यति। अकल्प्स्यत्। चिक्लृप्सति। कल्पिता। कल्पिष्यते। अकल्पिष्यत। चिकल्पिषते॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य तृतीयः पादः॥



॥ प्रथमाध्यायस्य चतुर्थः पादः ॥

आ कडारादेका संज्ञा ॥ १ ॥

'कडाराः कर्मधारये' (२.२.३८) इति वक्ष्यति। आ एतस्मात् सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामः , तत्र एका संज्ञा भवतीति वेदितव्यम्। का पुनरसौ ? या परानवकाशा च। अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम् , एकैव संज्ञा भवतीति। वक्ष्यति—'ह्रस्वं लघु' (१.४.१०)। भिदि, छिदि—भेत्ता। छेत्ता। 'संयोगे गुरु' (१.४.११)। शिक्षि, भिक्षि—शिक्षा। भिक्षा। संयोगपरस्य ह्रस्वस्य लघुसंज्ञा प्राप्नोति गुरुसंज्ञा च। एका संज्ञेति वचनाद् गुरुसंज्ञैव भवति। अततक्षत्। अररक्षत्। 'सन्वल्लघुनि०' (७.४.६३) इत्येष विधिर्न भवति॥

---

१ - ' यत्र परस्मैपदं तत्र तासि च क्लृप इतीट्प्रतिषेधः। यत्रात्मनेपदं तत्रेड् भवत्येव ' इत्यधिकं क्वचित् ।

विप्रतिषेधे परं कार्यम् ॥ २ ॥

तुल्यबलविरोधो विप्रतिषेधः। यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन् युगपत् प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः। तस्मिन् विप्रतिषेधे परं कार्यं भवति। उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्तीति नायमस्य योगस्य विषयः। बलवतैव तत्र भवितव्यम्। अप्रवृत्तौ पर्यायेण वा प्रवृत्तौ प्राप्तायां वचनमारभ्यते। 'अतो दीर्घो यञि' (७.३.१०१) 'सुपि च' (७.३.१०२) इत्यस्यावकाशः—वृक्षाभ्याम्। प्लक्षाभ्याम्। 'बहुवचने झल्येत्' (७.३.१०३) इत्यस्यावकाशः—वृक्षेषु। प्लक्षेषु। इहोभयं प्राप्नोति—वृक्षेभ्यः, प्लक्षेभ्य इति। परं भवति विप्रतिषेधेन॥

यू स्त्र्याख्यौ नदी ॥ ३ ॥

ई च ऊ च यू। अविभक्तिकोऽयं[1] निर्देशः। स्त्रियमाचक्षाते स्त्र्याख्यौ। मूलविभुजादिदर्शनात् (३.२.५ वा०) कप्रत्ययः। ईकारान्तमूकारान्तं च स्त्र्याख्यं शब्दरूपं नदीसंज्ञं भवति। ईकारान्तम्—कुमारी। गौरी। लक्ष्मीः। शार्ङ्गरवी। ऊकारान्तम्—ब्रह्मबन्धूः। यवागूः। यू इति किम्? मात्रे। दुहित्रे। स्त्र्याख्याविति किम्? ग्रामणीः। सेनानीः। खलपूः। आख्याग्रहणं किम्? शब्दार्थे स्त्रीत्व एव यथा स्यात् पदान्तराख्ये मा भूत्। ग्रामण्ये स्त्रियै। खलप्वे स्त्रियै। नदीप्रदेशाः—'आण् नद्याः' (७.३.११२) इत्येवमादयः॥

नेयङुवङ्स्थानावस्त्री ॥ ४ ॥

पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते। स्थितिः स्थानम्। इयङुवङोः स्थानमनयो- रितीयङुवङ्स्थानौ, तौ यू नदीसंज्ञौ न भवतः, स्त्रीशब्दं वर्जयित्वा। हे श्रीः। हे भ्रूः। अस्त्रीति किम्? हे स्त्रि॥

वामि ॥ ५ ॥

पूर्वेण नित्ये प्रतिषेधे प्राप्त आमि विकल्पः क्रियते। इयङुवङ्स्थानौ यू आमि परतो वा नदीसंज्ञौ न भवतः। श्रियाम्, श्रीणाम्। भ्रुवाम्, भ्रूणाम्। अस्त्रीत्येव—स्त्रीणाम्॥

ङिति ह्रस्वश्च ॥ ६ ॥

दीर्घस्य नदीसंज्ञा विहिता ह्रस्वस्य न प्राप्नोति, इयङुवङ्स्थानयोश्च प्रतिषिद्धा। तस्मान् ङिति वा विधीयते। ङिति परतो ह्रस्वश्च य्वोः संबन्धी यः स्त्र्याख्यः, स्त्र्याख्या-

---

१ - 'विरोधः' इत्येव न्यासे। २ - 'अयम्' इति नास्ति मुद्रितेषु।

वियडुवङ्स्थानौ च यू वा नदीसंज्ञौ भवतः। कृत्यै, कृतये। धेन्वै, धेनवे। श्रियै, श्रिये। भ्रुवै, भ्रुवे। अस्त्रीत्येव—स्त्रियै। स्त्र्याख्यावित्येव—अग्नये। वायवे। भानवे॥

शेषो घ्यसखि ॥ ७ ॥

ह्रस्व इति वर्तते। शेषोऽत्र घिसंज्ञो भवति, सखिशब्दं वर्जयित्वा। कश्च शेषः? ह्रस्वमिवर्णोवर्णान्तं यन्न स्त्र्याख्यम्, स्त्र्याख्यं च यन्न नदीसंज्ञकं स शेषः। अग्नये। वायवे। कृतये। धेनवे। असखीति किम्? सख्या। सख्ये। सख्युः। सख्यौ। घिग्रदेशाः—'द्वन्द्वे घि' (२.२.३२) इत्येवमादयः॥

पतिः समास एव ॥ ८ ॥

पतिशब्दस्य घिसंज्ञायां सिद्धायामयं नियमः क्रियते। पतिशब्दः समास एव घिसंज्ञो भवति। प्रजापतिना। प्रजापतये। समास इति किम् ? पत्या। पत्ये। एवकार इष्टतो- ऽवधारणार्थः। दृढमुष्टिना। दृढमुष्टये॥

षष्ठीयुक्तश्छन्दसि वा ॥ ९ ॥

पतिरिति वर्तते। पूर्वेण नियमेनासमासे न प्राप्नोतीति वचनमारभ्यते। षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि विषये वा घिसंज्ञो भवति। कुलुञ्चानां पतयै[1] नमः (तै० सं० ४.५.३.१)। कुलुञ्चानां पत्ये नमः। षष्ठीग्रहणं किम्? मया पत्या जरदष्टिर्यथासः (ऋ० १०.८५.३६)। छन्दसीति किम् ? ग्रामस्य पत्ये॥

ह्रस्वं लघु ॥ १० ॥

मात्रिकस्य ह्रस्वसंज्ञा कृता, तस्यानेन लघुसंज्ञा विधीयते। ह्रस्वमक्षरं लघुसंज्ञं भवति। भेत्ता। छेत्ता। अचीकरत्। अजीहरत्। लघुप्रदेशाः—'पुगन्तलघूपधस्य च' (७.३.८६) इत्येवमादयः॥

संयोगे गुरु ॥ ११ ॥

ह्रस्वमिति वर्तते। पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते। संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति। कुण्डा। हुण्डा। शिक्षा। भिक्षा। गुरुप्रदेशाः—'गुरोश्च हलः' (३.३.१०३) इत्येवमादयः॥

---

१ - ' एवकारकरणम् ' इति न्यासे। २ - ' क्षेत्रस्य पतये नमः। क्षेत्रस्य पत्ये नमः ' इत्यधिकं क्वचित्।

दीर्घं च ॥ १२ ॥

संयोग इति नानुवर्तते। सामान्येन संज्ञाविधानम्। दीर्घं चाक्षरं गुरुसंज्ञं भवति। ईहांचक्रे। ईक्षांचक्रे॥

यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥ १३ ॥

यस्मात् प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद् वा तदादि शब्दरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति। कर्ता । हर्ता। करिष्यति। हरिष्यति। अकरिष्यत्। औपगवः। कापटवः। यस्मादिति संज्ञिनिर्देशार्थम्, तदादीति संबन्धात्। प्रत्ययग्रहणं किम्? न्यविशत। व्यक्रीणीत। 'नेर्विशः' (१.३.१७) इत्युपसर्गाद् विधिरस्ति, तदादेरङ्गसंज्ञा स्यात्। विधिग्रहणं किम्? प्रत्ययपरत्वमात्रे मा भूत्। स्त्री इयती ॥ तदादिवचनं स्यादिनुमर्थम्॥ करिष्यावः, करिष्यामः। कुण्डानि। पुनः प्रत्ययग्रहणं किमर्थम्? लुप्तप्रत्यये मा भूत्। श्रूयर्थम्। भ्रूवर्थम्। अङ्गप्रदेशाः—'अङ्गस्य' (६.४.१) इत्येवमादयः॥

सुप्तिङन्तं पदम् ॥ १४ ॥

सुप्तिङिति प्रत्याहारग्रहणम्। सुबन्तं तिङन्तं च शब्दरूपं पदसंज्ञं भवति। ब्राह्मणाः पठन्ति। पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेः प्रतिषेधार्थम् (परि० २७)। गौरी ब्राह्मणितरा। पदप्रदेशाः—'पदस्य' (८.१.१६) 'पदात्' (८.१.१७) इत्येवमादयः॥

नः क्ये ॥ १५ ॥

क्य इति क्यच्क्यङ्क्यषां सामान्यग्रहणम्। नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति। क्यच्—राजीयति। क्यङ्—राजायते। क्यष्—वर्मायति, वर्मायते। सिद्धे सत्यारम्भो नियमार्थः। नान्तमेव क्ये परतः पदसंज्ञं भवति नान्यत्। वाच्यति। स्रुच्यति॥

सिति च ॥ १६ ॥

'यचि भम्' (१.४.१८) इति वक्ष्यति, तस्यायं पुरस्तादपवादः। सिति प्रत्यये परतः पूर्वं पदसंज्ञं भवति। 'भवतष्ठक्छसौ' (४.२.११५)—भवदीयः। 'ऊर्णाया युस्' (५.२.१२३)—ऊर्णायुः। 'ऋतोरण्' (५.१.१०५), 'छन्दसि घस्' (५.१.१०६)—ऋत्वियः॥

---

१ - 'ऊहाञ्चक्रे' इति न्यासे। २ - 'पचन्ति' इति क्वाचित्कः।

स्वादिष्वसर्वनामस्थाने ॥ १७ ॥

स्वादिष्विति सुशब्दादेकवचनाद् (४.१.२) आरभ्य आ कपः (५.४.१५१) प्रत्यया गृह्यन्ते। स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति। राजभ्याम्, राजभिः। राजत्वम्। राजता। राजतरः। राजतमः। असर्वनामस्थान इति किम्? राजानौ, राजानः॥

यचि भम् ॥ १८ ॥

स्वादिष्वसर्वनामस्थान इति वर्तते। पूर्वेण पदसंज्ञायां प्राप्तायां तदपवादो भसंज्ञा विधीयते। यकारादावजादौ च स्वादौ सर्वनामस्थानवर्जिते प्रत्यये परतः पूर्वं भसंज्ञं भवति। यकारादौ—गार्ग्यः। वात्स्यः। अजादौ—दाक्षिः। प्लाक्षिः ॥ नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्॥ नभ इव नभस्वत्। अङ्गिरा इव अङ्गिरस्वत्। मनुरिव मनुष्वत् ॥ वृषण्वस्वश्वयोः॥ वृषन्नित्येतत् वस्वश्वयोः परतो भसंज्ञं भवति छन्दसि विषये। वृषण्वसुः (ऋ० १.१११.१)। वृषणश्वस्य मेने (श० ब्रा० ३.३.४.१८)। भप्रदेशाः—'भस्य' (६.४.१२६) इत्येवमादयः॥

तसौ मत्वर्थे ॥ १९ ॥

भमिति वर्तते। तकारान्तं सकारान्तं शब्दरूपं मत्वर्थे प्रत्यये परतो भसंज्ञं भवति। उदश्वित्वान् घोषः। विद्युत्वान् बलाहकः। सकारान्तम्—यशस्वी। पयस्वी। तसाविति किम्? तक्षवान् ग्रामः॥

अयस्मयादीनिच्छन्दसि ॥ २० ॥

अयस्मयादीनि शब्दरूपाणि छन्दसि विषये साधूनि भवन्ति। भपदसंज्ञाधिकारे विधानात् तेन मुखेन साधुत्वमयस्मयादीनां विधीयते। अयस्मयं वर्म (पै० सं० १.३७.५)। अयस्मयानि (कौ० सू० ८१.१८) पात्राणि। क्वचिदुभयमपि भवति। स सुष्टुभा स ऋक्वता ग१णेन (ऋ० ४.५०.५)। पदत्वात् कुत्वं भत्वाज् जश्त्वं न भवति। छन्दसीति किम्? अयोमयं वर्म। आकृतिगणोऽयम्॥

बहुषु बहुवचनम् ॥ २१ ॥

ङ्याप्प्रातिपदिकात् स्वादयः, लस्य तिबादय इति सामान्येन बहुवचनं विहितम्,

---

१ - ' आकृतिगणोऽयम् ' इति नास्ति बाल०।

तस्यानेन बहुत्वसंख्या वाच्यत्वेन विधीयते। बहुषु बहुवचनं भवति। बहुत्वमस्य वाच्यं भवतीति यावत्। कर्मादयोऽप्यपरे विभक्तीनामर्था वाच्याः, तदीये बहुत्वे बहुवचनम्। कर्मादिषु बहुषु बहुवचनमित्यर्थः। ब्राह्मणाः पठन्ति। यत्र च संख्या संभवति तत्रायमुपदेशः। अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एव॥

द्व्येकयोर्द्विवचनैकवचने ॥ २२ ॥

द्वित्वैकत्वयोरर्थयोर्द्विवचनैकवचने भवतः। एतदपि सामान्यविहितयोर्द्विवचनैकवचनयोरर्थाभिधानम्। द्वित्वे द्विवचनं भवति, एकत्व एकवचनं भवति। ब्राह्मणौ पठतः। ब्राह्मणः पठति॥

कारके ॥ २३ ॥

कारक इति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते। कारक इत्यधिकारो वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामः कारक इत्येवं तद् वेदितव्यम्। कारकशब्दश्च निमित्तपर्यायः। कारकं हेतुरित्यनर्थान्तरम्। कस्य हेतुः? क्रियायाः। वक्ष्यति—'ध्रुवमपायेऽपादानम्' (१.४.२४)—ग्रामादागच्छति। पर्वतादवरोहति। कारक इति किम्? वृक्षस्य पर्ण पतति। कुड्यस्य पिण्डः पतति। 'अकथितं च' (१.४.५१)—अकथितं च कारकं कर्मसंज्ञं भवति। माणवकं पन्थानं पृच्छति। कारक इति किम्? माणवकस्य पितरं पन्थानं पृच्छति। कारकसंशब्दनेषु चानेनैव विशेषणेन व्यवहारो विज्ञायते॥

ध्रुवमपायेऽपादानम् ॥ २४ ॥

ध्रुवं यदपाययुक्तमपाये साध्ये यदवधिभूतं तत् कारकमपादानसंज्ञं भवति। ग्रामादा- गच्छति। पर्वतादवरोहति। सार्थाद् धीनः। रथात् पतितः॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्॥ अधर्माज् जुगुप्सते। अधर्माद् विरमति। धर्मात् प्रमाद्यति। अपादानप्रदेशाः— 'अपादाने पञ्चमी' (२.३.२८) इत्येवमादयः॥

भीत्रार्थानां भयहेतुः ॥ २५ ॥

बिभेत्यर्थानां त्रायत्यर्थानां च धातूनां प्रयोगे भयहेतुर्यस्तत् कारकमपादानसंज्ञं भवति। चौरेभ्यो बिभेति। चौरेभ्य उद्विजते। त्रायत्यर्थानाम्-चौरेभ्यस्त्रायते। चौरेभ्यो रक्षति। भयहेतुरिति किम्? अरण्ये बिभेति। अरण्ये त्रायते॥

पराजेरसोढः ॥ २६ ॥

---

[1] १ - ' पचतः ..... पचति' इति बाल०।

परापूर्वस्य जयतेः प्रयोगेऽसोढो योऽर्थः, सोढुं न शक्यते, तत् कारकमपादानसंज्ञं भवति। अध्ययनात् पराजयते। असोढ इति किम्? शत्रून् पराजयते॥

वारणार्थानामीप्सितः ॥ २७ ॥

वारणार्थानां धातूनां प्रयोगे य ईप्सितोऽर्थः, तत् कारकमपादानसंज्ञं भवति। प्रवृत्तिविघातो वारणम्। यवेभ्यो गा वारयति। यवेभ्यो गा निवर्तयति। ईप्सित इति किम्? यवेभ्यो गा वारयति क्षेत्रे॥

अन्तर्धौ येनादर्शनमिच्छति ॥ २८ ॥

व्यवधानमन्तर्धिः। अन्तर्धिनिमित्तं येनादर्शनमात्मन इच्छति, तत् कारकमपादानसंज्ञं भवति। उपाध्यायाद् अन्तर्धत्ते। उपाध्यायाद् निलीयते। मा मामुपाध्यायो द्राक्षीदिति निलीयते। अन्तर्धाविति किम्? चौरान् न दिदृक्षते। इच्छतिग्रहणं किम्? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्॥

आख्यातोपयोगे ॥ २९ ॥

आख्याता प्रतिपादयिता। उपयोगो नियमपूर्वकं विद्याग्रहणम्। उपयोगे साध्ये य आख्याता, तत् कारकमपादानसंज्ञं भवति। उपाध्यायादधीते। उपाध्यायादागमयति। उपयोग इति किम्? नटस्य गाथां[1] शृणोति ॥

जनिकर्तुः प्रकृतिः ॥ ३० ॥

जनेः कर्ता जनिकर्ता। जन्यर्थस्य जन्मनः कर्ता जायमानः, तस्य या प्रकृतिः कारणं हेतुः, तत् कारकमपादानसंज्ञं भवति। शृङ्गाच् छरो जायते। गोमयाद् वृश्चिको जायते॥

भुवः प्रभवः ॥ ३१ ॥

कर्तुरिति वर्तते। भवनं भूः। प्रभवत्यस्मादिति प्रभवः। भूकर्तुः प्रभवो यः, तत् कारकमपादानसंज्ञं भवति। हिमवतो गङ्गा प्रभवति। काश्मीरेभ्यो वितस्ता प्रभवति। प्रथमत उपलभ्यत इत्यर्थः॥

---

१ - 'गाथाम्' इति यथान्यासम् ।

कर्मणा यमभिप्रैति स सम्प्रदानम् ॥ ३२ ॥

कर्मणा करणभूतेन कर्ता यमभिप्रैति, तत् कारकं संप्रदानसंज्ञं भवति। अन्वर्थसंज्ञा- विज्ञानाद् ददातिकर्मणेति विज्ञायते। उपाध्यायाय गां ददाति। माणवकाय भिक्षां ददाति ॥ क्रियाग्रहणमपि कर्तव्यम्॥ क्रिययापि यमभिप्रैति स संप्रदानम्। श्राद्धाय निगर्हते। युद्धाय संनह्यते। पत्ये शेते। संप्रदानप्रदेशाः—'चतुर्थी संप्रदाने' (२.३.१३) इत्येवमादयः ॥ कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य च कर्मसंज्ञा॥ पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥

रुच्यर्थानां प्रीयमाणः ॥ ३३ ॥

रुचिना समानार्था रुच्यर्थाः। अन्यकर्तृकोऽभिलाषो रुचिः। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योऽर्थः, तत् कारकं संप्रदानसंज्ञं भवति। देवदत्ताय रोचते मोदकः। यज्ञदत्ताय स्वदतेऽपूपः। देवदत्तस्थस्याभिलाषस्य मोदकः कर्ता। प्रीयमाण इति किम्? देवदत्ताय रोचते मोदकः पथि॥

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥ ३४ ॥

श्लाघ, ह्नुङ्, स्था, शप् इत्येतेषां ज्ञीप्स्यमानो योऽर्थः, तत् कारकं संप्रदानसंज्ञं भवति। ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाणो बोधयितुमभिप्रेतः। देवदत्ताय श्लाघते। देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः। एवं देवदत्ताय ह्नुते। यज्ञदत्ताय ह्नुते। देवदत्ताय तिष्ठते। यज्ञदत्ताय तिष्ठते। देवदत्ताय शपते। यज्ञदत्ताय शपते। ज्ञीप्स्यमान इति किम् ? देवदत्तः श्लाघते ॥

धारेरुत्तमर्णः ॥ ३५ ॥

धारयतेः प्रयोग उत्तमर्णो योऽर्थः, तत् कारकं संप्रदानसंज्ञं भवति। उत्तममृणं यस्य स उत्तमर्णः। कस्य चोत्तममृणम् ? यदीयं धनम्, धनस्वामी प्रयोक्ता उत्तमर्णः, स संप्रदानसंज्ञो भवति। देवदत्ताय शतं धारयति। यज्ञदत्ताय शतं धारयति। उत्तमर्ण इति किम्? देवदत्ताय शतं धारयति ग्रामे॥

स्पृहेरीप्सितः ॥ ३६ ॥

'स्पृह ईप्सायाम्' (चु० २६४) चुरादावदन्तः पठ्यते। तस्येप्सितो योऽर्थः, तत् कारकं संप्रदानसंज्ञं भवति। ईप्सित इत्यभिप्रेत उच्यते। पुष्पेभ्यः स्पृहयति। फलेभ्यः

स्पृहयति। ईप्सित इति किम् ? पुष्पेभ्यो वने स्पृहयति॥

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ ३७ ॥

अमर्षः क्रोधः। अपकारो द्रोहः। अक्षमेर्ष्या। गुणेषु दोषाविष्करणमसूया। क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः, तत् कारकं संप्रदानसंज्ञं भवति। क्रोधस्तावत् कोप एव, द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। तस्मात् सामान्येन विशेषणं 'यं प्रति कोप' इति। देवदत्ताय क्रुध्यति। देवदत्ताय द्रुह्यति। देवदत्तायेर्ष्यति। देवदत्तायासूयति। यं प्रति कोप इति किम्? भार्यामीर्ष्यति, मैनामन्यो द्राक्षीदिति॥

क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ ३८ ॥

पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। क्रुधद्रुहोरुपसृष्टयोरुपसर्ग-संबद्धयोर्यं प्रति कोपः, तत् कारकं कर्मसंज्ञं भवति। देवदत्तमभिक्रुध्यति। देवदत्तमभिद्रुह्यति। उपसृष्टयोरिति किम्? देवदत्ताय क्रुध्यति। यज्ञदत्ताय द्रुह्यति॥

राधीक्ष्योर्यस्य विप्रश्नः ॥ ३९ ॥

राधेरीक्षेश्च कारकं संप्रदानसंज्ञं भवति। कीदृशम्? यस्य विप्रश्नः, विविधः प्रश्नः विप्रश्नः। स कस्य भवति? यस्य शुभाशुभं पृच्छ्यते। देवदत्ताय राध्यति। देवदत्तायेक्षते। नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः॥

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ ४० ॥

प्रति आङ् इत्येवंपूर्वस्य शृणोतेः कारकं संप्रदानसंज्ञं भवति। कीदृशम्? पूर्वस्य कर्ता। प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्तते। स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति। तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्ता संप्रदानसंज्ञो भवति। देवदत्ताय गां प्रतिशृणोति। देवदत्ताय गामाशृणोति। प्रतिजानीत इत्यर्थः॥

अनुप्रतिगृणश्च ॥ ४१ ॥

पूर्वस्य कर्तेति वर्तते। अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं भवति। होत्रेऽनुगृणाति। होत्रे प्रतिगृणाति। होता प्रथमं शंसति, तमन्यः प्रोत्साहयति। अनुगरः प्रतिगर इति हि शंसितुः प्रोत्साहने वर्तते। होत्रेऽनुगृणाति। होतारं शंसन्तं प्रोत्साहयतीत्यर्थः॥

---

१ - ' यत्संबन्धि ' इति पद०। २ - अपेक्षितमपीदमुदाहरणं न सार्वत्रिकम्।

साधकतमं करणम् ॥ ४२ ॥

क्रियासिद्धौ यत् प्रकृष्टोपकारकं विवक्षितम्, तत् साधकतमं कारकं करणसंज्ञं भवति। दात्रेण लुनाति। परशुना छिनत्ति। तमब्ग्रहणं किम्? गङ्गायां घोषः। कूपे गर्गकुलम्। करणप्रदेशाः—'कर्तृकरणयोस्तृतीया' (२.३.१८) इत्येवमादयः॥

दिवः कर्म च ॥ ४३ ॥

पूर्वेण करणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। दिवः साधकतमं यत् कारकम्, तत् कर्मसंज्ञं भवति चकारात् करणसंज्ञं च। अक्षान् दीव्यति। अक्षैर्दीव्यति॥

परिक्रयणे सम्प्रदानमन्यतरस्याम् ॥ ४४ ॥

साधकतममिति वर्तते। पूर्वेण करणसंज्ञायां प्राप्तायां संप्रदानसंज्ञा पक्षे विधीयते। परिक्रयणे साधकतमं कारकमन्यतरस्यां संप्रदानसंज्ञं भवति। परिक्रयणं नियतकालं वेतनादिना स्वीकरणम्, नात्यन्तिकः क्रय एव। शतेन परिक्रीतोऽनुब्रूहि। शताय परिक्रीतोऽनुब्रूहि। सहस्रेण परिक्रीतोऽनुब्रूहि। सहस्राय परिक्रीतोऽनुब्रूहि॥

आधारोऽधिकरणम् ॥ ४५ ॥

आध्रियन्तेऽस्मिन् क्रिया इत्याधारः। कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारः, तत् कारकमधिकरणसंज्ञं भवति। कट आस्ते। कटे शेते। स्थाल्यां पचति। अधिकरणप्रदेशाः—'सप्तम्यधिकरणे च' (२.३.३६) इत्येवमादयः॥

अधिशीङ्स्थासां कर्म ॥ ४६ ॥

पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। अधिपूर्वाणां शीङ् स्था आस् इत्येतेषामाधारो यः, तत् कारकं कर्मसंज्ञं भवति। ग्राममधिशेते। ग्राममधितिष्ठति। पर्वतमध्यास्ते॥

अभिनिविशश्च ॥ ४७ ॥

अभिनिपूर्वस्य विशतेराधारो यः, तत् कारकं कर्मसंज्ञं भवति। ग्राममभिनिविशते। कथं कल्याणेऽभिनिवेशः, पापेऽभिनिवेशः, या या संज्ञा यस्मिन् यस्मिन् संज्ञिन्यभिनिविशत इति? अन्यतरस्यामिति वर्तते, 'परिक्रयणे संप्रदानमन्यतरस्याम्' (१.४.४४) इत्यतः। सा च व्यवस्थितविभाषा विज्ञायते॥

उपान्वध्याङ्वसः ॥ ४८ ॥

उप अनु अधि आङ् इत्येवंपूर्वस्य वसतेराधारो यः, तत् कारकं कर्मसंज्ञं भवति। ग्राममुपवसति सेना। पर्वतमुपवसति। ग्राममनुवसति। ग्राममधिवसति। ग्राममावसति॥ वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः॥ ग्राम उपवसति। भोजननिवृत्तिं करोतीत्यर्थः॥

कर्तुरीप्सिततमं कर्म ॥ ४९ ॥

कर्तुः क्रियया यदाप्तुमिष्टतमम् , तत् कारकं कर्मसंज्ञं भवति। कटं करोति। ग्रामं गच्छति। कर्तुरिति किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न कर्तुः। तमब्ग्रहणं किम्? पयसौदनं भुङ्क्ते। कर्मेत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्। इतरथाधारस्यैव हि स्यात्। गेहं प्रविशतीति। ओदनं पचति सक्तून् पिबतीत्यादिषु न स्यात्। पुनः कर्मग्रहणात् सर्वत्र सिद्धं भवति। कर्मप्रदेशाः—'कर्मणि द्वितीया' (२.३.२) इत्येवमादयः॥

तथायुक्तं चानीप्सितम् ॥ ५० ॥

येन प्रकारेण कर्तुरीप्सिततमं क्रियया युज्यते, तेनैव चेत् प्रकारेण यदनीप्सितं युक्तं भवति, तस्य कर्मसंज्ञा विधीयते। ईप्सितादन्यत् सर्वमनीप्सितं द्वेष्यमितरच्च। विषं भक्षयति। चौरान् पश्यति। ग्रामं गच्छन् वृक्षमूलान्युपसर्पति॥

अकथितं च ॥ ५१ ॥

अकथितं च यत् कारकम्, तत् कर्मसंज्ञं भवति। केनाकथितम् ? अपादानादिभिर्विशेषकथाभिः। परिगणनं कर्तव्यम् —

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।
ब्रुविशासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना॥

उपयुज्यत इत्युपयोगः पयःप्रभृति, तस्य निमित्तं गवादि, तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते। पाणिना कांस्यपात्र्यां गां दोग्धि पयः। पाण्यादिकमप्युपयोगनिमित्तम्, तस्य कस्माद् न भवति ? नैतदस्ति। विहिता हि तत्र करणादिसंज्ञा। तदर्थमाह—अपूर्वविधाविति। ब्रुविशासिगुणेन च यत् सचते। ब्रुविशास्योर्गुणः साधनं प्रधानं कर्म धर्मादिकम्, तेन यत् संबध्यते, तदकीर्तितमाचरितं कविना, तदकथितमुक्तं सूत्रकारेण। दुहि—गां दोग्धि पयः। याचि—पौरवं गां याचते। रुधि—गामवरुणद्धि व्रजम्। प्रच्छि—माणवकं पन्थानं पृच्छति। भिक्षि—पौरवं गां भिक्षते। चिञ्—वृक्षमवचिनोति

फलानि। ब्रुवि—माणवकं धर्मं ब्रूते। शासि—माणवकं धर्ममनुशास्ति॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥ ५२॥

अर्थशब्दः प्रत्येकमभिसंबध्यते। गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां च धातूनां तथा शब्दकर्मकाणामकर्मकाणां चाण्यन्तानां यः कर्ता, स ण्यन्तानां कर्मसंज्ञो भवति। गच्छति माणवको ग्रामम्। गमयति माणवकं ग्रामम्। याति माणवको ग्रामम्। यापयति माणवकं ग्रामम् ॥ गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः॥ नयति भारं देवदत्तः। नाययति भारं देवदत्तेन। वहति भारं देवदत्तः। वाहयति भारं देवदत्तेन ॥ वहेरनियन्तृकर्तृक- स्येति वक्तव्यम्॥ इह प्रतिषेधो मा भूत्—वहन्ति यवान् बलीवर्दाः। वाहयति यवान् बलीवर्दानिति। बुद्धि—बुध्यते माणवको धर्मम्। बोधयति माणवकं धर्मम्। वेत्ति माणवको धर्मम्। वेदयति माणवकं धर्मम्। प्रत्यवसानमभ्यवहारः—भुङ्क्ते माणवक ओदनम्। भोजयति माणवकमोदनम्। अश्नाति माणवक ओदनम्। आशयति माणवकमोदनम् ॥ आदिखाद्योः प्रतिषेधो वक्तव्यः॥ अत्ति माणवक ओदनम्। आदयते माणवकेनौदनम्। खादति माणवकः। खादयति माणवकेन॥ भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः॥ भक्षयति पिण्डीं देवदत्तः। भक्षयति पिण्डीं देवदत्तेनेति। अहिंसार्थस्येति किम्? भक्षयन्ति बलीवर्दाः सस्यम्, भक्षयन्ति बलीवर्दान् सस्यम्। शब्दकर्मणाम्—अधीते माणवको वेदम्। अध्यापयति माणवकं वेदम्। पठति माणवको वेदम्। पाठयति माणवकं वेदम्। अकर्मकाणाम्—आस्ते देवदत्तः। आसयति देवदत्तम्। शेते देवदत्तः। शाययति देवदत्तम्। एतेषामिति किम्? पचत्योदनं देवदत्तः। पाचयत्योदनं देवदत्तेनेति। अण्यन्तानामिति किम्? गमयति देवदत्तो यज्ञदत्तम्, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः॥

हक्रोरन्यतरस्याम् ॥ ५३ ॥

अणि कर्ता स णाविति वर्तते। हरतेः करोतेश्चाण्यन्तयोर्यः कर्ता, स ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवति। हरति भारं माणवकः। हारयति भारं माणवकम् , माणवकेनेति वा। करोति कटं देवदत्तः, कारयति कटं देवदत्तम्, देवदत्तेनेति वा ॥ अभिवादिदृशोरात्मनेपद उपसंख्यानम्॥ अभिवदति गुरुं देवदत्तः। अभिवादयते गुरुं देवदत्तम्, देवदत्तेनेति वा। पश्यन्ति भृत्या राजानम्। दर्शयते भृत्यान् राजा, भृत्यैरिति वा। आत्मनेपद इति किम्? दर्शयति चैत्रं मैत्रमपरः। प्राप्तविकल्पत्वाद् द्वितीयैव। अभिवादयति गुरुं माणवकेन पिता। अप्राप्तविकल्पत्वात्तृतीयैव॥

---

१ - ' भक्षयति ' इति न्यास-पद०। २ - यथामहाभाष्यम् । ' राजानम् ' इति मुद्रितेषु ।

स्वतन्त्रः कर्ता ॥ ५४ ॥

स्वतन्त्र इति प्रधानभूत उच्यते, अगुणभूतः। यः क्रियासिद्धौ स्वातन्त्र्येण विवक्ष्यते, तत् कारकं कर्तृसंज्ञं भवति। देवदत्तः पचति। स्थाली पचति। कर्तृप्रदेशाः—'कर्तृकरणयोस्तृतीया' (२.३.१८) इत्येवमादयः॥

तत्प्रयोजको हेतुश्च ॥ ५५ ॥

तदित्यनन्तरः कर्ता परामृश्यते। तस्य प्रयोजकः तत्प्रयोजकः। निपातनात् समासः। स्वतन्त्रस्य प्रयोजको योऽर्थः, तत् कारकं हेतुसंज्ञं भवति चकारात् कर्तृसंज्ञं च। संज्ञासमावेशार्थश्चकारः। कुर्वाणं प्रयुङ्क्ते, कारयति। हारयति। हेतुत्वाद् णिचो निमित्तं कर्तृत्वाच्च कर्तृप्रत्ययेनोच्यते। हेतुप्रदेशाः—'हेतुमति च' (३.१.२६) इत्येवमादयः॥

प्राग्रीश्वरान्निपाताः ॥ ५६ ॥

'अधिरीश्वरे' (१.४.९७) इति वक्ष्यति। प्रागेतस्मादवधेर्यानित ऊर्ध्वमनुक्रमिष्यामः निपातसंज्ञास्ते वेदितव्याः। वक्ष्यति 'चादयोऽसत्त्वे' (१.४.५७) च वा ह अह। प्राग्वचनं संज्ञासमावेशार्थम्। गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिस्सह निपातसंज्ञा समाविशति। रेफोच्चारणम् 'ईश्वरे तोसुन्कसुनौ' (३.४.१३) इत्ययमवधिर्मा विज्ञायीति॥

रीश्वराद् वीश्वरान् मा भूत् कृन्मेजन्तः परोऽपि सः।
समासेष्वव्ययीभावो लौकिकं चातिवर्तते ॥

चादयोऽसत्त्वे ॥ ५७ ॥

चादयो निपातसंज्ञा भवन्ति न चेत् सत्त्वे वर्तन्ते। प्रसज्यप्रतिषेधोऽयम्, सत्त्वमिति च द्रव्यमुच्यते। च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। सूपत्। कूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। नह। हन्त। माकिम्। नकिम्। माङ्। माङो ङकारो विशेषणार्थो 'माङि लुङ्' (३.३.१७५) इति। इह न भवति—मा भवतु, मा भविष्यति। नञ्। यावत्। तावत्। त्वा। त्वै। द्वै। रै। श्रौषट्। वौषट्। स्वाहा। वषट्। स्वधा। ओम्। किल। तथा। अथ। सु। स्म। अस्मि। अ। इ। उ। ऋ। ऌ। ए। ऐ। ओ। औ। अम्। तक्। उञ्। उकञ्। वेलायाम्। मात्रायाम्। यथा। यत्। यम्। तत्। किम्। पुरा। अद्धा। धिक्। हाहा। हे। है। प्याट्। पाट्। थाट्। अहो। उताहो। हो। तुम्। तथाहि। खलु। आम्। आहो। अथो। ननु। मन्ये। मिथ्या। असि। ब्रूहि। तु। नु। इति। इव। वत्। चन। बत। इह। शम्।

---

१ - ' च ' इति यथान्यासपद०। मुद्रितेषु नास्ति। २ - ' आम् ' इत्यधिकं बालादि०।

कम्। अनुकम्। नहिकम्। हिकम्। सुकम्। सत्यम्। ऋतम्। श्रद्धा। इद्धा। मुधा। नोचेत्। नचेत्। नहि। जातु। कथम्। कुतः। कुत्र। अव। अनु। हाहौ। हैहा। ईहा। आहोस्वित्। छम्बट्। खम्। दिष्ट्या। पशु। वट्। सह। आनुषक्। अङ्ग। फट्। ताजक्। अये। अरे। चटु। बाट्। कुम्। खुम्। घुम्। हुम्। आईम्। शीम्। सीम्। वै। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः (ग० सू० १६)। उपसर्गप्रतिरूपकाः —

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते॥

'अच उपसर्गात् तः' (७.४.४७) इति तत्वं न भवति। दुर्नीतम्। दुर्नयः। दुर्निर्णयः। 'उपसर्गाद०' (८.४.१४) इति णत्वं न भवति। असत्त्व इति किम् ? पशुर्वै पुरुषः। पशुः पुरोडाशः। निपातप्रदेशाः—'स्वरादिनिपातमव्ययम्' (१.१.३७) इत्येवमादयः॥

प्रादयः ॥ ५८ ॥

प्रादयोऽसत्त्वे निपातसंज्ञा भवन्ति। प्र। परा। अप। सम्। अनु। अव। निस्। निर्। दुस्। दुर्। वि। आङ्। नि। अधि। अपि। अति। सु। उत्। अभि। प्रति। परि। उप। पृथग्योगकरणमुत्तरसंज्ञाविशेषणार्थम्। 'उपसर्गाः क्रियायोगे' (१.४.५९) इति चादीनामुपसर्गसंज्ञा मा भूत्। असत्त्व इत्येव—परा जयन्ति सेनाः॥

उपसर्गाः क्रियायोगे ॥ ५९ ॥

प्रादयः क्रियायोग उपसर्गसंज्ञा भवन्ति। प्रणयति। परिणयति। प्रणायकः। परिणायकः। क्रियायोग इति किम् ? प्रगतो नायकोऽस्माद् देशात् प्रनायको देशः॥ मरुच्छब्दस्य चोपसंख्यानं कर्तव्यम्॥ मरुद्भिर्दत्तो मरुत्तः। संज्ञाविधानसामर्थ्यादनन्तत्वेऽपि 'अच उपसर्गात् तः' (७.४.४७) इति तत्वं भवति॥ श्रच्छब्दस्योपसंख्यानम्॥ 'आतश्चोपसर्गे' (३.३.१०६) इत्यङ् भवति। श्रद्धा। उपसर्गप्रदेशाः—'उपसर्गे घोः किः' (३.३.९२) इत्येवमादयः॥

गतिश्च ॥ ६० ॥

---

१ - अत उत्तरम् - " वाकिर् , नकिर् , आङ् , ' अ, मा, नो, ना प्रतिषेधे', उत, दह " इत्यधिकं क्वचित्।

२ - अत उत्तरम् - 'त्वै, तुवै, नुन्वै, अध, अधस्, स्मि, अच्छ, अदल, दह, हेहे, हैहै, नौ, म, आस्, शस्, शुकम्, सम्, वव, वात्, ङिकम्, हिनुक्, वशम्, शिकम्, श्वकम्, सनुकम्, नुकम्, अन्त, द्यौ, सुक्, भाजक्, अले, वट्, वाट्, कीम्' इत्यधिकं क्वचित्।

३ - पुरुषो वै पशुः। जै० ब्रा० २.४२ ।

४ - मुद्रितेषु एकवचनम्।

गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे। प्र॒कृत्यं। प्रकृ॑तम्। यत् प्र॒कृ॒रोति॑। योगविभाग उत्तरार्थः। उत्तरत्र गतिसंज्ञैव यथा स्यात्, उपसर्गसंज्ञा मा भूत्। ऊरीस्यादित्यत्र 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' (८.३.८७) इति षत्वं प्रसज्येत। चकारः संज्ञासमावेशार्थः। प्रणी॑तम्। अ॒भिषि॑क्तम्। 'गतिरनन्तरः' (६.२.४९) इति स्वरः, 'उपसर्गाद्०' (८.४.१४, ८.३.६५) इति णत्वषत्वे च भवतः॥ कारिकाशब्दस्योपसंख्यानम्॥ कारिकाकृत्य। कारि॑काकृतम्। यत् कारि॑काक॒रोति॑ ॥ पुनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यम्॥ पुनरुत्स्यू॒तं वा॑सो॒ दे॒यम् (मै० सं० १.७.२)। 'गतिर्गतौ' (८.१.७०) इति निघातो भवति। (उ॒शिग्दू॒तः) चनो॑ हितः (ऋ० ३.११.२)। 'गतिरनन्तरः' (६.२.४९) इति स्वरः। गतिप्रदेशाः—'कुगतिप्रादयः' (२.२.१८) इत्येवमादयः॥

ऊर्यादिच्विडाचश्च ॥ ६१ ॥

ऊर्यादयः शब्दाः च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञा भवन्ति। च्विडाचोः कृभ्वस्तियोगे विधानम्। तत्साहचर्यादूर्यादीनामपि तैरेव योगे गतिसंज्ञा विधीयते। ऊरीउररीशब्दावङ्गीकरणे विस्तारे च। ऊरीकृत्य। ऊरी॑कृतम्। यदू॑रीक॒रोति॑। उररीकृत्य। उर॑रीकृतम्। यदु॑ररीक॒रोति॑। पापी। ताली। आताली। वेताली। धूसी। शकला। संशकला। ध्वंसकला। भ्रंशकला। एते शकलादयो हिंसायाम्। शकलाकृत्य। संशकलाकृत्य। ध्वंसकलाकृत्य। भ्रंशकलाकृत्य। गुलगुधा पीडार्थे। गुलगुधाकृत्य। सजूः सहार्थे। सजूःकृत्य। फलू, फली, विक्ली, आक्ली इति विकारे। फलूकृत्य। फलीकृत्य। विक्लीकृत्य। आक्लीकृत्य। आलोष्टी, कराली, केवाली, शेवाली, वर्षाली, मस्मसा, मसमसा। एते हिंसायाम्। वषट्। वौषट्। श्रौषट्। स्वाहा। स्वधा। बन्धा। प्रादुस्। श्रुत्। आविस्। च्व्यन्ताः खल्वपि—शुक्लीकृत्य। शु॑क्लीकृतम्। यत् शु॑क्लीक॒रोति॑। डाच्—पटपटाकृत्य। पट॑पटाकृतम्। यत् पट॑पटाक॒रोति॑॥

अनुकरणं चानितिपरम् ॥ ६२ ॥

इतिः परो यस्मादिति बहुव्रीहिः। अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं भवति। खाट्कृत्य। खाट्कृ॑तम्। यत् खा॑ट्क॒रोति॑। अनितिपरमिति किम् ? खाडिति कृत्वा निरष्ठीवत्॥

आदरानादरयोः सदसती ॥ ६३ ॥

प्रीतिसंभ्रम आदरः। परिभवौदासीन्यमनादरः। आदरानादरयोर्यथाक्रमं

---

१ - ' आक्लीकृत्य ' इति नास्ति है०। २ - ' प्रीत्यतिशयः ' इति बाल०।

सदसच्छब्दौ गतिसंज्ञौ भवतः। सत्कृत्य। सत्कृतम्। यत् संत्करोति। असत्कृत्य। असत्कृतम्। यदसत्करोति। आदरानादरयोरिति किम् ? सत् कृत्वा काण्डं गतः। असत् कृत्वा काण्डं गतः॥

भूषणेऽलम् ॥ ६४ ॥

अलमिति प्रतिषेधे, सामर्थ्ये, पर्याप्तौ, भूषणे चेति विशेषणमुपादीयते। भूषणे योऽलंशब्दः स गतिसंज्ञो भवति। अलंकृत्य। अलंकृतम्। यदलंकरोति। भूषण इति किम्? अलं भुक्त्वौदनं गतः॥

अन्तरपरिग्रहे ॥ ६५ ॥

अन्तःशब्दोऽपरिग्रहेऽर्थे गतिसंज्ञो भवति। परिग्रहः स्वीकरणं तदभावे गतिसंज्ञा विधीयते। अन्तर्हत्य। अन्तर्हतम्। यदन्तर्हन्ति। अपरिग्रह इति किम्? अन्तर्हत्वा मूषिकां श्येनो गतः। परिगृह्य गत इत्यर्थः ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या॥ अन्तर्धा। अन्तर्धिः। अन्तर्णयति॥

कर्णेमनसी श्रद्धाप्रतीघाते ॥ ६६ ॥

कर्णेशब्दो मनस्शब्दश्च श्रद्धाप्रतीघाते गतिसंज्ञौ भवतः। कर्णेहत्य पयः पिबति। मनोहत्य पयः पिबति। तावत् पिबति यावदस्याभिलाषो निवृत्तः। श्रद्धा प्रतिहतेत्यर्थः। श्रद्धाप्रतीघात इति किम्? कर्णे हत्वा गतः। मनो हत्वा गतः॥

पुरोऽव्ययम् ॥ ६७ ॥

असिप्रत्ययान्तः पुरः शब्दोऽव्ययम्, स गतिसंज्ञो भवति। समासस्वरोपचाराः प्रयोजनम्। पुरस्कृत्य। पुरस्कृतम्। यत् पुरस्करोति। अव्ययमिति किम् ? पूः, पुरौ। पुरः कृत्वा गतः॥

अस्तं च ॥ ६८ ॥

अस्तंशब्दो मकारान्तोऽव्ययमनुपलब्धौ वर्तते, स गतिसंज्ञो भवति। अस्तंगत्य सविता पुनरुदेति। अस्तंगतानि धनानि। यदस्तंगच्छति। अव्ययमित्येव—अस्तं कृत्वा काण्डं गतः। क्षिप्तमित्यर्थः॥

अच्छ गत्यर्थवदेषु ॥ ६९ ॥

---

१ - 'काण्डम्' इत्यधिकं मुद्रितेषु।

अच्छशब्दोऽव्ययमभिशब्दस्यार्थे वर्तते। स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति। अच्छगत्य। अच्छगतम्। यदच्छ्गच्छति। वदतौ—अच्छोद्य। अच्छोदितम्। यदच्छ्वदति। अव्ययमित्येव—उदकमच्छं गच्छति॥

अदोऽनुपदेशे ॥ ७० ॥

अदः शब्दस्त्यदादिषु पठ्यते, सोऽनुपदेशे गतिसंज्ञो भवति। उपदेशः परार्थः प्रयोगः। स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्त्युपदेश इति सोऽस्य विषयः। अदःकृत्य। अ१दःकृतम्। यददःक१रोति। अनुपदेश इति किम् ? अदः कृत्वा काण्डं गत इति परस्य कथयति॥

तिरोऽन्तर्धौ ॥ ७१ ॥

अन्तर्धिर्व्यवधानम्। तत्र तिरःशब्दो गतिसंज्ञो भवति। तिरोभूय। तिरोभूतम्। यत् तिरोभवति। अन्तर्धाविति किम् ? तिरो भूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः॥

विभाषा कृञि ॥ ७२ ॥

अन्तर्धाविति वर्तते। प्राप्तविभाषेयम्। तिरःशब्दः करोतौ परतो विभाषा गतिसंज्ञो भवति। तिरःकृत्य। तिरस्कृत्य। तिरस्कृतम्। यत् तिरस्क१रोति। तिरः कृत्वा। तिरस्कृत्वा। अन्तर्धावित्येव—तिरः कृत्वा काष्ठं तिष्ठति॥

उपाजेऽन्वाजे ॥ ७३ ॥

विभाषा कृञीति वर्तते। उपाजेऽन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्तेते, तौ कृञि विभाषा गतिसंज्ञौ भवतः। उपाजेकृत्य, उपाजे कृत्वा। अन्वाजेकृत्य, अन्वाजे कृत्वा॥

साक्षात्प्रभृतीनि च ॥ ७४ ॥

विभाषा कृञीति वर्तते। साक्षात्प्रभृतीनि शब्दरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति ॥ साक्षात्प्रभृतिषु च्व्यर्थवचनम् ॥ साक्षात्कृत्य, साक्षात्कृत्वा। मिथ्याकृत्य, मिथ्या कृत्वा॥ साक्षात्। मिथ्या। चिन्ता। भद्रा। लोचना। विभाषा। संपत्का। आस्था। अमा। श्रद्धा। प्राजर्या। प्राजरुहा। वीजर्या। वीजरुहा। संसर्या। अर्थे। लवणम्। उष्णम्। शीतम्। उदकम्। आर्द्रम्। गतिसंज्ञासंनियोगेन लवणादीनां मकारान्तत्वं निपात्यते। अग्नौ। वशे। विकम्पने। विहसने। प्रहसने। प्रतपने।

प्रादुस्। नमस्। आविस्॥

अनत्याधान उरसिमनसी ॥ ७५ ॥

विभाषा कृञीति वर्तते। अत्याधानमुपश्लेषणम्, तदभावेऽनत्याधान उरसिमनसी शब्दौ विभाषा कृञि गतिसंज्ञौ भवतः। उरसिकृत्य, उरसि कृत्वा। मनसिकृत्य, मनसि कृत्वा। अनत्याधान इति किम् ? उरसि कृत्वा पाणिं शेते॥

मध्येपदेनिवचने च ॥ ७६ ॥

विभाषा कृञीति वर्तते चकारादनत्याधान इति च। मध्ये पदे निवचने इत्येते शब्दा अनत्याधाने विभाषा कृञि गतिसंज्ञा भवन्ति। मध्येकृत्य, मध्ये कृत्वा। पदेकृत्य, पदे कृत्वा। निवचनं वचनाभावः। निवचनेकृत्य, निवचने कृत्वा। वाचं नियम्येत्यर्थः। अनत्याधान इत्येव—हस्तिनः पदे कृत्वा शिरः शेते॥

नित्यं हस्ते पाणावुपयमने ॥ ७७ ॥

कृञीति वर्तते। हस्ते पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवत उपयमने। उपयमनं दारकर्म। पाणौकृत्य। हस्तेकृत्य। दारकर्म कृत्वेत्यर्थः। उपयमन इति किम्? हस्ते कृत्वा कार्षापणं गतः॥

प्राध्वं बन्धने ॥ ७८ ॥

कृञीति वर्तते। प्राध्वमिति मकारान्तमव्ययमानुकूल्ये वर्तते, तदानुकूल्यं बन्धनहेतुकं यदा भवति तदा प्राध्वंशब्दः कृञि नित्यं गतिसंज्ञो भवति। प्राध्वंकृत्य। बन्धन इति किम्? प्राध्वं कृत्वा शकटं गतः॥

जीविकोपनिषदावौपम्ये ॥ ७९ ॥

कृञीति वर्तते। जीविका उपनिषदित्येतौ शब्दावौपम्ये विषये कृञि गतिसंज्ञौ भवतः। जीविकाकृत्य। उपनिषत्कृत्य। औपम्य इति किम् ? जीविकां कृत्वा गतः॥

ते प्राग् धातोः ॥ ८० ॥

ते गत्युपसर्गसंज्ञकाः धातोः प्राक् प्रयोक्तव्याः। तथा चैवोदाहृताः। तेग्रहणमुपसर्गार्थम्। गतयो ह्यनन्तराः॥

छन्दसि परेऽपि ॥ ८१ ॥

प्राक् प्रयोगे प्राप्ते छन्दसि परेऽप्यभ्यनुज्ञायन्ते। छन्दसि विषये गत्युपसर्गसंज्ञकाः परेऽपि पूर्वेऽपि प्रयोक्तव्याः। न च परेषां प्रयुज्यमानानां संज्ञाकार्यं किञ्चिदस्ति। केवलं परप्रयोगेऽपि क्रियायोग एषामस्तीति ज्ञाप्यते। याति नि हस्तिना, नियाति हस्तिना। हन्ति नि मुष्टिना, निहन्ति मुष्टिना॥

व्यवहिताश्च ॥ ८२ ॥

व्यवहिताश्च गत्युपसर्गसंज्ञकाः छन्दसि दृश्यन्ते। आ म॑न्द्रैरिं॑न्द्र॑ हरिं॑ भिर्या॒हि म॑यूर॑रोमभिः (ऋ० ३.४५.१)। आ यां॑हि (ऋ० ६.१६.१०)॥

कर्मप्रवचनीयाः ॥ ८३ ॥

कर्मप्रवचनीया इत्यधिकारो वेदितव्यः। यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसंज्ञास्ते वेदितव्याः। 'अधिरीश्वरे' (१.४.९७) इति यावद् वक्ष्यति। कर्मप्रवचनीयप्रदेशाः—'कर्मप्रवचनीययुक्ते द्वितीया' (२.३.८) इत्येवमादयः॥

अनुर्लक्षणे ॥ ८४ ॥

अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। शाकल्यस्य संहितामनु प्रावर्षत्। अनडुद्यज्ञम् (मा० गृ० २.१०.७) अन्वसिञ्चत्। अगस्त्यमन्वसिञ्चन् प्रजाः। किमर्थमिद- मुच्यते, यावता 'लक्षणेत्थंभूताख्यान०' (१.४.९०) इति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा? हेत्वर्थं तु वचनं हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात्॥

तृतीयार्थे ॥ ८५ ॥

अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। नदीमन्ववसिता सेना। पर्वतमन्ववसिता सेना। पर्वतेन संबद्धेत्यर्थः॥

हीने ॥ ८६ ॥

हीन इति न्यून उच्यते स च उत्कृष्टापेक्षः। तेनेयं हीनोत्कृष्टसंबन्धे संज्ञा विज्ञायते। हीने द्योत्येऽयमनुः कर्मप्रवचनीयसंज्ञो भवति। अनु शाकटायनं वैयाकरणाः। अन्वर्जुनं योद्धारः॥

---

१ - अत्र ग्रन्थशैल्या 'वेदितव्या अधिरीश्वर इति यावत्। वक्ष्यति 'अनुर्लक्षणे' (१.४.८४) शाकल्यस्य संहितामनु प्रावर्षत्' इति पाठो युक्ततरकः स्यात्। २ - 'हेतौ तृतीयां' इति न्यासः।

उपोऽधिके च ॥ ८७ ॥

उपशब्दोऽधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। उप खार्यां द्रोणः। उप निष्के कार्षापणम्। हीने—उप शाकटायनं वैयाकरणाः॥

अपपरी वर्जने ॥ ८८ ॥

अपपरी शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ भवतः। प्रकृतेन संबन्धिना कस्यचिदनभिसंबन्धो वर्जनम्। अप त्रिगर्तेभ्यो वृष्टो देवः। परिपरि त्रिगर्तेभ्यो वृष्टो देवः। वर्जन इति किम्? ओदनं परिषिञ्चति॥

आङ् मर्यादावचने ॥ ८९ ॥

आङित्येष शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति। अवधिर्मर्यादा। वचनग्रहणादभिविधिरपि गृह्यते। आ पाटलिपुत्राद् वृष्टो देवः। आ कुमारं यशः पाणिनेः। आ सांकाश्यात्। आ मथुरायाः। मर्यादावचन इति किम्? ईषदर्थे क्रियायोगे च मा भूत्॥

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ ९० ॥

लक्षण इत्थंभूताख्याने भागे वीप्सायां च विषयभूतायां प्रति परि अनु इत्येते कर्मप्रवचनीयसंज्ञा भवन्ति। लक्षणे तावत्—वृक्षं प्रति विद्योतते विद्युत्। वृक्षं परि। वृक्षमनु। इत्थंभूताख्याने—साधुर्देवदत्तो मातरं प्रति। मातरं परि। मातरमनु। भागे—यदत्र मां प्रति स्यात्। मां परि स्यात्। मामनु स्यात्। वीप्सायाम्—वृक्षंवृक्षं प्रति सिञ्चति। परि सिञ्चति। अनु सिञ्चति। लक्षणादिष्विति किम्? ओदनं परिषिञ्चति। अथ परिशब्दयोगे पञ्चमी कस्माद् न भवति 'पञ्चम्यपाङ्परिभिः' (२.३.१०) इति? वर्जनविषये सा विधीयते, अपशब्दसाहचर्यात्॥

अभिरभागे ॥ ९१ ॥

लक्षणादिष्वेव भागवर्जितेष्वभिः कर्मप्रवचनीयसंज्ञो भवति। वृक्षमभि विद्योतते। साधुर्देवदत्तो मातरमभि। वृक्षंवृक्षमभि सिञ्चति। अभाग इति किम्? भागः स्वीक्रियमाणोंऽशः। यदत्र ममाभिष्यात् तद् दीयताम्। यदत्र मम भवति तद् दीयतामित्यर्थः॥

प्रतिः प्रतिनिधिप्रतिदानयोः ॥ ९२ ॥

मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानम्। प्रतिनिधिविषये प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसंज्ञो भवति। अभिमन्युरर्जुनतः प्रति। माषानस्मै

तिलेभ्यः प्रति यच्छति॥

अधिपरी अनर्थकौ ॥ ९३ ॥

अधिपरी शब्दावनर्थकावनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः। कुतोऽध्यागच्छति? कुतः पर्यागच्छति? गत्युपसर्गसंज्ञाबाधनार्था कर्मप्रवचनीयसंज्ञा विधीयते॥

सुः पूजायाम् ॥ ९४ ॥

सुशब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति। सु सिक्तं भवता। सु स्तुतं भवता। धात्वर्थः स्तूयते। उपसर्गसंज्ञाश्रयं षत्वं न भवति। पूजायामिति किम्? सुषिक्तं किं तवात्र॥

अतिरतिक्रमणे च ॥ ९५ ॥

अतिशब्दोऽतिक्रमणे चकारात् पूजायां च कर्मप्रवचनीयसंज्ञो भवति। निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिरतिक्रमणम्। अति सिक्तमेव भवता। अति स्तुतमेव भवता। पूजायाम्—अति सिक्तं भवता। अति स्तुतं भवता। शोभनं कृतमित्यर्थः॥

अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ॥ ९६ ॥

पदार्थे संभावनेऽन्ववसर्गे गर्हायां समुच्चये च वर्तमानोऽपिः कर्मप्रवचनीयसंज्ञो भवति। पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः—सर्पिषोऽपि स्यात्। मधुनोऽपि स्यात्। मात्रा बिन्दुः स्तोकमित्यस्यार्थेऽपिशब्दो वर्तते। संभावनमधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणम्—अपि सिञ्चेन् मूलकसहस्रम्। अपि स्तुयाद् राजानम्। अन्ववसर्गः कामचाराभ्यनुज्ञानम्—अपि सिञ्च। अपि स्तुहि। गर्हा निन्दा—धिग् जाल्मं देवदत्तम्, अपि सिञ्चेत् पलाण्डुम्। अपि स्तुयाद् वृषलम्। समुच्चये—अपि सिञ्च, अपि स्तुहि। सिञ्च च स्तुहि च। उपसर्गसंज्ञाबाधनात् षत्वं न भवति॥

अधिरीश्वरे ॥ ९७ ॥

ईश्वरः स्वामी, स च स्वमपेक्षते। तदयं स्वस्वामिसम्बन्धे कर्मप्रवचनीयसंज्ञो भवति। तत्र कदाचित् स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति, कदाचित् स्वात्। अधि ब्रह्मदत्ते पञ्चालाः। अधि पञ्चालेषु ब्रह्मदत्तः॥

---

१ - ' अधिः ' इत्यधिकं है०।

विभाषा कृञि ॥ ९८ ॥

अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति। यदत्र मामधिकरिष्यति[1]। कर्म- प्रवचनीयसंज्ञापक्षे गतिसंज्ञाबाधनात् 'तिङि चोदात्तवति' (८.१.७१) इति निघातो न भवति॥

लः परस्मैपदम् ॥ ९९ ॥

ल इति षष्ठ्यादेशापेक्षा। लादेशाः परस्मैपदसंज्ञा भवन्ति। तिप्, तस्, झि। सिप्, थस्, थ। मिप्, वस्, मस्। शतृक्वसू च। परस्मैपदप्रदेशाः—'सिचि वृद्धिः परस्मैपदेषु' (७.२.१) इत्येवमादयः॥

तङानावात्मनेपदम् ॥ १०० ॥

तङिति प्रत्याहारो नवानां वचनानाम्। आन इति शानच्कानचोर्ग्रहणम्। पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां तङानयोरात्मनेपदसंज्ञा विधीयते। त, आताम्, झ। थास्, आथाम्, ध्वम्। इट्, वहि, महिङ्। आनः खल्वपि—शानचूकानचौ। ल इत्येव—कतीह निघ्नानाः। आत्मनेपदप्रदेशाः—'अनुदात्तङित आत्मनेपदम्' (१.३.१२) इत्येवमादयः॥

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १०१ ॥

तिङोऽष्टादश प्रत्ययाः। नव परस्मैपदसंज्ञकाः नवात्मनेपदसंज्ञकाः। तत्र परस्मै- पदेषु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसंज्ञा भवन्ति। आत्मनेपदेष्वपि त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा भवन्ति। तिप्, तस्, झि इति प्रथमः। सिप्, थस्, थ इति मध्यमः। मिप्, वस्, मस् इत्युत्तमः। आत्मनेपदेषु—त, आताम्, झ इति प्रथमः। थास्, आथाम्, ध्वम् इति मध्यमः। इट्, वहि, महिङ् इत्युत्तमः। प्रथममध्यमोत्तमप्रदेशाः—'शेषे प्रथमः' (१.४.१०८) इत्येवमादयः॥

तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ १०२ ॥

तानि एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति। एकश एकैकं पदम्। तिबित्येक- वचनम्। तसिति द्विवचनम्। झीति बहुवचनम्। एवं सर्वत्र। एकवचनद्विवचनबहुवचन- प्रदेशाः—'बहुषु बहुवचनम्' (१.४.२१) इत्येवमादयः॥

---

१ - इदं वाक्यं नास्ति है०।

२ - ' तिङस्त्रीणि त्रीणि पदानि भूत्वा ' इत्यधिकं क्वचित्।

सुपः ॥ १०३ ॥

तिङां त्रिकेष्वेकवचनादिसंज्ञा विहिताः, संप्रति सुपां त्रिकेषु विधीयन्ते। सुपश्च त्रीणि त्रीणि पदान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति। सु इत्येकवचनम्। औ इति द्विवचनम्। जसिति बहुवचनम्। एवं सर्वत्र॥

विभक्तिश्च ॥ १०४ ॥

त्रीणित्रीणीत्यनुवर्तते। त्रीणित्रीणि विभक्तिसंज्ञाश्च भवन्ति सुपस्तिङश्च। विभक्ति-प्रदेशाः—'अष्टन आ विभक्तौ' (७.२.८४) इत्येवमादयः॥

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १०५ ॥

'लस्य' (३.४.७७) इत्यधिकृत्य सामान्येन तिबादयो विहिताः, तेषामयं पुरुषनियमः क्रियते। युष्मद्युपपदे सति व्यवहिते चाव्यवहिते सति समानाधिकरणे समानाभिधेये तुल्यकारके स्थानिनि प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि मध्यमपुरुषो भवति। त्वं पचसि। युवां पचथः। यूयं पचथ। अप्रयुज्यमानेऽपि—पचसि। पचथः। पचथ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ १०६ ॥

प्रहासः परिहासः क्रीडा। प्रहासे गम्यमाने मन्योपपदे धातोर्मध्यमपुरुषो भवति, मन्यतेश्चोत्तमः, स चैकवद् भवति। एहि मन्य ओदनं भोक्ष्यस इति, नहि भोक्ष्यसे, भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि, नहि यास्यसि, यातस्तेन ते पिता। मध्यमोत्तमयोः प्राप्तयोरुत्तममध्यमौ विधीयेते। प्रहास इति किम् ? एहि मन्यस ओदनं भोक्ष्य इति। सुष्ठु मन्यसे, साधु मन्यसे॥

अस्मद्युत्तमः ॥ १०७ ॥

उत्तमपुरुषो नियम्यते। अस्मद्युपपदे समानाभिधेये प्रयुज्यमानेऽप्यप्रयुज्यमाने-ऽप्युत्तमपुरुषो भवति। अहं पचामि। आवां पचावः। वयं पचामः। अप्रयुज्यमानेऽपि—पचामि। पचावः। पचामः॥

शेषे प्रथमः ॥ १०८ ॥

शेष इति मध्यमोत्तमविषयादन्य उच्यते। यत्र युष्मदस्मदी समानाधिकरणे उपपदे न स्तः, तत्र शेषे प्रथमपुरुषो भवति। पचति। पचतः। पचन्ति॥

परः संनिकर्षः संहिता ॥ १०६ ॥

परशब्दोऽतिशये वर्तते। संनिकर्षः प्रत्यासत्तिः। परो यः संनिकर्षो वर्णानामर्ध- मात्राकालव्यवधानं स संहितासंज्ञो भवति। दध्यत्र। मध्वत्र। संहिताप्रदेशाः—'संहितायाम्' (६.१.७२) इत्येवमादयः॥

विरामोऽवसानम् ॥ ११० ॥

विरतिर्विरामः। विरम्यतेऽनेनेति वा विरामः। सोऽवसानसंज्ञो भवति। दधिँ। मधुँ। वृक्षः। प्लक्षः। अवसानप्रदेशाः—'खरवसानयोर्विसर्जनीयः' (८.३.१५) इत्येवमादयः॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य चतुर्थः पादः॥

— o —